भाट्टदीपिका प्रभावली तृतीयाध्याय:

४२५८

मीमांसा

॥ भाट्ट दिपिकाप्रभावलि

१७..

तं०
१

श्रीगणपतये नमः ॥ श्रीगुरुभ्यो नमः ॥ अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकं ॥ सर्वाभीष्टप्रदं नौमि श्रीरूपं सुंदरं महः १ यो वेद
दशास्त्राण्यवपारदृश्वा यज्ञादिकर्माचरणोऽतिदक्षः ॥ सदाशिवाराधनशुद्धचित्तस्तं वालकृष्णं पितरं नमामि २ श्रीखंडदेवं प्रणिपत्य स
द्गुरुं मांसकस्वांतसरोजभास्करं ॥ अत्यंतसंक्षिप्तसयत्नार्थयत्नकृतोऽप्रभावत्वां टिप्पणमातनोम्यहं ३ यद्यप्यस्य गुरोः कृतावपि
मपाप्युद्भाव्यतेकाचनासंभूत तस्तदपि प्रचारवतुरैर्नेषा पुरोभागिता ॥ किंतु स्मीतिलकाः कुशाग्रधिषणाः सिद्धांतदृढाद
रा महाकं परिहृत्य न त्कृतिमलंकुर्वंत्वियं मे मतिः ४ अथातः शेषलक्षणं ॥ यद्यप्यथशब्दस्यानंतर्ये पूर्वप्रकृतापेक्षित्व
मधिकारश्चेति त्रयोर्थास्तथापि जिज्ञासासूत्रे शब्देन निर्दिष्टस्यैव पूर्वप्रकृतत्वनियमे सत्यध्ययनस्य पूर्वं शेषेणानिर्दिष्टत्वा
भावेन पूर्वप्रकृतापेक्षीर्थत्वानुपपत्तेर्जिज्ञासापाश्चप्रमाणवस्तु परं तंत्रत्वेनकृनिष्ठाध्यायत्वाभावाच्छब्दव्यापारदृष्टाधि
धिकारासंभवाद्विचारलक्षणायां प्रमाणमावाच्च नद्भयार्थत्वमनंगीकृत्यानंतर्यार्थत्वमेवाथशब्दस्य स्वीकृतं प्रकृते तु शे
षत्वनिरूपणापरशब्दव्यापारसंभवेनाधिकारार्थत्वोपपत्तेस्तस्य च भेदलक्षणानंतरमेव क्रियमाणत्वेनानंतर्येतदु ।
पजीव्यत्वेन च पूर्वप्रकृतापेक्षितत्वसार्थादेव सिद्धेनैतदर्थकत्वमप्याश्रयणीयं निरुक्तं वार्तिके एवमर्थद्वयेनैव दथश
ब्दस्य वर्णिते ॥ संबंधो ध्याययोरुक्तो तद्वार्थात्सिद्ध एव सः ॥ ततश्चापुनरुक्तत्वाद्रूपमारणार्थगोचरा ॥ अधिकारार्थता

वक्तुमयशब्दस्य शक्यते। इति। एवमयशब्दार्थस्य चयनमुखयहणाय वृत्तावनिष्पमाणार्थं प्रतिजानीते। तदेवमिति। शेषस्ये
वाधिकारोत्रपुक्तो नान्यस्य कस्यचित्त शेषधर्मास्तिध्यपेक्षत्वादन्यलक्षणो वाकूधिपामिति वार्त्तिकोक्तावसरं सूचयितुं संप्रती
त्युक्तं। यद्यपन्योन्यसंबंधाच्छेषशेषिणोरुभयोरपि ज्ञाना निरूपणमावश्यकं प्रत्युत प्राधान्याच्छेषिनिरूपणमेव कर्तुं यु
क्तमिति सूत्रे शेषलक्षणमित्युक्तमयुक्तमित्याशंकानिरासाय शेषिनिरूषिनिरूपिते त्वाधुक्तं शेषोऽस्यास्तीति मत्व
र्थतया शेषिनिरूपणे कर्तव्ये विशेषणविधायानि विश्यस्य शेषस्य निरूपणावश्यकत्वात्तन्निरूपणोचार्थादेव शेषिनिरू
पणसिद्धेः श्रुत्यादिप्रमाणानां च शेषत्व एव व्यापारात्तत्समवायेबलाबलस्य च शेषिणापविरुद्धत्वेन शेषत्वे एव संभवादा
वश्यकं शेषनिरूपणमेव कर्तव्यमभिप्रेत्य सूत्रे तन्मात्र प्रतिज्ञानं तत्र च वक्ष्यमाणलक्षणांगत्वेनोक्तो गत्वघटकीभूतो दे
श्यताशालित्वरूपशेषित्वस्यार्थादेव निरूपणमिति न विरोधः एतेन शेषित्वज्ञानस्यानंतरीयकसिद्धिकत्वमुपपादितवतो
पि सिद्धमनायस्य तन्निरूपणोपाध्यायार्थात्वोक्तिर्वार्तिकविरुद्धत्वादयास्तेति भावः सूत्रे शेषपदे भावप्रयानत्वस्य अने
काधिकार्यर्थपरत्वाभावस्य च सूचितेन शेषत्वमंगत्वं लक्ष्यते येनाध्याये न तेवक्ष्याम इति सूत्रार्थमभिप्रेत्याह। शेषत्वेतिसो
त्रातः शब्दं विह्न एवन्पूर्वोत्तराध्यायार्थनिरूपणयोर्हेतुहेतुमद्भावसंगतिं दर्शयति। भिन्नाणामिति। द्रव्यकर्मणोरिति। द

प्र०[illegible]० ध्यादिद्रव्याणां तथा कर्मणो लोकसिद्धभेदवतां द्वितीये ऽनिरूपितभेदानां मिथोंगांगिभाव इत्यर्थः। कर्मणामेव मिथो।गां
१२ गिभावनिरूपणस्य द्वितीयाध्यायसिद्धभेदनिरूपणाधीनत्वात्सामानाधिकरण्येन संगत्युपपत्त्या परिहरति। तथापीति॥
द्रव्याद्यंगत्वनिरूपणस्यास्मिन्पक्षे ऽसंगत्यापत्तिं परिहर्तुं पक्षांतरमाह। अंशेनैवेति। शेषत्वमात्रनिरूपणस्याध्यायार्थत्वे
क्रत्वादिप्रमाणादिनिरूपणस्य करिष्यमाणस्याध्यायासंगतिं परिहरन्नाह। तच्चानेकेनेति। ततश्च शेषत्वलक्षणप्रतिज्ञे
ये वतत्संबंधिविचारजातस्य करिष्यमाणस्य सर्वस्य प्रतिज्ञासिद्धेस्तस्याप्यध्यायार्थत्वावतस्यासंगतिरित्यर्थः। तत्र भाष्ये कः शे
2 षः केन हेतुना शेषः कथं च विनियुज्यते क्रत्वादीनि च विनियोगे कारणानीति वक्ष्यते यांचलववलवदन्ता। एतेनान्यार्थेण
न्यदप्युपोद्घातादिनेत्यनेकप्रकारता दर्शिता। तत्र शेषः परार्थत्वादिति सूत्रे पंचम्यंतेन हेतूपादानद्वारा लक्षणस्योक्त
स्य शाब्दत्वप्रतीतेस्तेनैवार्थात्सिद्धस्य स्वरूपस्यार्थिकत्वमभिप्रेत्य स्वरूपकथनपरस्यापि भाष्यस्यार्थिकाभिप्रायक
तां सूचयन्लक्षणपरतया व्याख्यानं दर्शयति। अंगत्वलक्षणमिति। पिनप्रवृत्तिनिमित्तेन हेतुना शेषपदं प्रयाजादिषु २
प्रयुज्यते न च शेषपदशक्यतावच्छेदकमेवेत्यभिप्रेत्य द्वितीयप्रतिज्ञापरभाष्यार्थमाह। शेष इति। अवघातादिकं क्र
त्वादिभिर्विनियुज्यमानं क्रत्वरूपावच्छिन्नोद्देश्यतावाधेन सर्वेषु विनियुज्यते ऽतस्तद्वाधेनेत्यर्थकतृतीयप्रतिज्ञापर

भाष्यस्यातात्पर्योर्थं दर्शयति। अंगांगितयोरिति। एतत्तात्पर्येणान्यदप्युपोद्घातादिनेति भाष्यसूचितं प्रतिज्ञांतरमाह। विरोध
विरोध श्चेति। आदिपदेन विरोधै विचारप्रसक्तानुप्रसक्त्या करिष्यमाणविचारस्य संग्रहः॥ शेषः प्रयाजादौ शेषपदवाच्यता
नुमाने परार्थत्वस्य पंचम्या हेतुत्वाभिधानात्तस्यैव शेषपदशक्यतावच्छेदकत्वमर्थाच्च स्वरूपपरिचायकत्वापत्त्याय
द्यलक्षणत्वमपीत्यभिप्रेत्याह। यदेववहीति। उपकारकत्वं शेषत्वं बादरिणोच्यते यच्चयेन विनापन्नमवतिसवीजा
दिरंकुरादिः शेषइत्येवमविनाभावहेतुकं शेषत्वं परैरुच्यते तन्निराकर्तुं शेषः परार्थत्वादिति सूत्रेण पारार्थ्यरूपं शेषत्व
मुक्तं जैमिनिना तद्व्याचष्टे। तत्रेति। पश्वंगभूतानामपि प्रयाजगोदोहनादीनां पुरोडाशप्रणयनाद्युपकारकत्वे न तदंगतात्तेषांप
त्तेरप्युक्तमुपकारकत्व रूपं तल्लक्षणं तथाग्नेयादीनां मिथो विनाभावेन परस्परमंगत्वापत्तेरविनाभावलक्षणमप्य
युक्तं किंतु पारार्थ्यमेवेत्यर्थः। ननु किमिदं परार्थत्वं नाम तद्यदि परोद्देशप्रवृत्तकृतिसमवायित्वं तदाऽचेतनेया
गादावव्याप्तिः। यदि तूक्तकृतिसाध्यत्वं तत्तदा देशकालकर्त्रादावव्याप्तिः। एतेन परोद्देशप्रवृत्तकृतिसमवायित्वं तदा रो
ऽचेतने यागादावव्याप्तिः। यदि तूक्तकृतिसंबंधित्वं तदा निमित्तेऽतिव्याप्तिः। अतः पारार्थ्यस्यापि निर्वचनानर्हत्वान्नत
ल्लक्षणत्वं संभवतीत्यत आह। तच्चेति। तदंगत्वमिति। तदुद्देशपनिरूपितांगत्वमित्यर्थः। कारकत्वेन विध्यन्वयादि

सं०पा०भा० तिा कृतौ कारकत्वे न हेतुनातद्धि शिष्टकृतौ विधेयत्वेपि सत्यर्थाद्धि शेषणीभूते यागे विधेयानुप्रवेशेन विधेयत्वं पाद्धिहितत्वा
२११ यागेड् इति लक्षणासमन्वय इत्यर्थः। समस्मा घे स्वर्गोद्देशेन प्रयाजादीनां विधाना शंका निराकरणपूर्वकं पारिलवत्
निराकरिष्यतेनत दनुसंधाय लक्षणात्वं दर्शयति। प्रधानोद्देशेति। अव्ययस्य क्रियानिवर्त्तकत्वेन गुणस्य द्रव्यपरिच्छेद
इत्येति कत्वेन करणत्वेनाचयान्तत्रापि तद्वचयं दर्शयति। तत्र क्रमस्यापि पदार्थपरिच्छेदकत्वेन कारकस्यापि विधानात्तस्या
प्युपलक्षणं। षष्ठीति। यथा ध्वर्यवमितिसमाख्या कल्प्ये विधौ अध्वर्योः षष्ठ्यां संबंधमात्रावगमेपि तस्य कर्तृत्वे पर्यवसाने
न कर्तृत्वेन यागतत्त्वपदार्थयोगत्वमित्यर्थः। निमित्तस्यानुष्ठापकतयोद्देश्यत्वेनान्वयात्रिमित्तोद्देशे प्रवृत्तं कस्तु तिकारकत्वेन विहि
तत्वस्य यागे सत्वा [illegible] त्रिमित्तांगत्वं निरसितुमाह। निमित्तस्येति। यथा चास्येति। अतिदेशेन प्रयाजादीनां पशुयागोद्देशप्रवृ
त्तकृतिकारकत्वेन विहितत्वेपि पशुपुरोडाशे उपकारमात्रापेक्षे पदार्थांशे ऽतिदेशीकल्पनात्तदुद्देशप्रवृत्तकृतिकारकत्वे
न विधानाभावेन्नातिव्याप्तिः। एवं गोदोहनस्य प्रणापनोपकारकस्यापि तदुद्देश्यकृतिकारकत्वाभावान्नातिव्याप्तिः। अत्र च २११
कृतिकारकत्वमित्येतावन्मात्रोक्तौ फलस्यापि कर्मतासंबंधेन कृतिकारत्वात्फलेगत्वापत्तिरतः परोद्देशप्रवृत्तेत्यर्थकं प
दुद्देशे प्रवृत्तेति कृतिविशेषणं। फलस्य च फलं प्रतिपरत्वाभावाद्गोक्तदेशप्रवृत्तपुरुषकृतौ कर्मतया फलस्य विधेयत्वेप

नभोग्यंगत्वेपिनफलांगत्वेनप्रसक्तिः। एतदेवाभिप्रेत्योद्देश्यतापर्यवसन्नेवेत्याद्युक्तं। अपूर्वस्यापिफलोद्देशप्रवृत्तकृतेनोकारणत्वेना
न्वयोत्फलांगत्वोपपत्तिरित्यादिकोक्तभेदकृत्स्वेविस्तरइत्यर्थः। यद्यप्यवघातादीनांव्रीह्याद्यंगत्वेव्रीह्यादीनांलोकसिद्धानामेवो
पादानान्नव्रीह्युद्देश्यप्रवृत्तिकृतिरिस्ति। तथापिअपूर्वसाधनत्वाकारेणातदुद्देश्यप्रवृत्तकृतिसंभवान्नकृतिः। भावनादिप्रत्ती ति
। कृतेःकृत्यंतराभावात्कारकस्यकारकांतराभावाद्यागस्यभावनांप्रतितस्याश्चफलंप्रतिशाब्दभावनायाश्चार्थभावनांप्रतिपश्वा
देश्चकारकंप्रतिकारकंत्वस्यचक्रियांप्रत्यंगत्वव्यवहारोभाक्तइत्यर्थः। यत्तुप्रकाशकारैर्भावनायाःफलांगत्वादिस्वस्वेष्टांप्र
त्येतां। द्रव्यदेशकालकर्त्रादेरपिकारणात्वाधिकरणात्वकर्तृत्वादिप्र[illegible]वृत्तिद्वाराप्रवर्तनयेवजन्यतइतिस्वेष्टंप्रत्यंगभा
तिभावनायाःफलांगत्वव्यवहारोपिमुख्यइत्युक्तांतदाह परागादिवृत्तिनिमित्तात्वस्य प्रवृत्तिद्वाराप्रवर्तनाजन्यत्वेन
तस्याप्यंगत्वापत्तेःशाब्दभावनायाअर्थभावनांगत्वस्यैवमपिदुरुपपादत्वादयुक्तमितिव्यक्तंकौस्तुभे। यदपिभाट्टाल
कारकृतात्रिविध्यमन्वयिनांकृतौयद्विषयत्वानुपपत्तिर्यदुद्देश्यकत्वेनपरिक्रियतेतत्तस्यांगंतत्तदर्थमित्युक्तं। तत्र। काल
बोधक संबंधेवाकोकात्वादिवृत्तिकृतिविषयत्वानुपपत्तिपरिहारस्यकर्मोद्देश्यत्वेनाप्यसंभवादेवकालोद्देशेनकर्मणारावकृ
तिविषयत्वांगीकारेणकर्मणःकालांगत्वापत्त्याकालस्यकर्मांगत्वानापत्तेः। अस्मन्मतेतुकृतिविषयत्वरूपोपादेयत्वस्य

मानाधिकरण्येनविधेयत्वंस्यौत्सर्गिकस्यसंनिधानादिप्रत्यभिज्ञायकथमारामत्वेवाधेनोयादेयत्वसमानाधिका
४ णविधेयत्वासंभवेतिअज्ञाततदधिकरणत्वज्ञापनेनविधेयत्वंनानुपपन्नं।अत्रचव्यापारभेदेनकारणांसेदृन्तहूरि
तांगत्वेस्यापिप्रतिपदार्थभेदावममेनतत्तदंगत्वंप्रतिप्रयाजत्वादेरेवलक्ष्यतावच्छेदकत्वंसूचयितुंलक्षणेयन्तथ
चोपादानं।कृतिकारकत्वेननविधानवयित्वरूपपारार्थ्यस्यअकृत्यादिप्रमाणानिविनावक्तुमशक्यत्वात्तन्यथ्यर्थादिहो
पक्षिप्तानातिध्येयं।आक्षेपेषंपवादेषुप्राप्त्याललक्षणाकर्मणि।प्रयोजनमनेनवक्तव्यंपत्रकृत्वाप्रवर्ततइति।न्यायेन
प्रयोजनस्यावक्तव्यत्वादनुक्तिः।द्रव्यगुणाअदृष्टप्राप्त्यालंत्रोक्तस्यलक्षणस्यलक्ष्यप्रदर्शनाद्वाराकःशेषइत्यपमं।
शोनिरूप्यतेइत्यभिप्रेत्याह।यघपीति।ननुलिङः फलोपहितप्रवृत्त्यनुकूलव्यापाररूपप्रवर्तनाभिधायित्वात्तयाच
फलोपहितप्रवृत्तेरिष्टसाधनताज्ञानंविनाऽजननात्तदाक्षेपावश्यंभावेदृष्टोद्देशेनसाधूनतयाविधानंसंभवात्क
थंनयागादेर्लक्ष्यत्वमित्यतआह।विधेरिति।योग्यतयाप्रवृत्त्यनुकूलव्यापारत्वमेवलिङर्थः।ननुफलोपहितप्रवृत्त्य ४
नुकूलत्वं।येनप्रवृत्तिविषयस्ययागादेरिष्टोद्देश्यकृतिकारकत्वमाक्षिपेत।काम्यकर्मणि।कामनायांसत्यामपिविधि
ज्ञातश्रवणेमिकदाचित्प्रवृत्त्यजननात्।अतश्चप्रवृत्तिजननयोग्यमात्रस्यविधेःस्वविषयेदृष्टोद्देश्यककृतिकार

कर्तृत्वानाक्षेपकत्वान्न यागादेः पारार्थ्यसिद्धिरित्यर्थः। न च स्वर्गकामपदेन स्वर्गस्योद्देश्यत्वावगमे सत्यर्थाद्यागस्य भावांशेप
निपातासंभवात्करणत्वेनैव विधानान्नानुपपत्तिरित्यत आह। स्वर्गकामेति। एवं च यागस्यैव भाव्यत्वात्स्वर्गकामस्य कर्तृत्वेता
न्वयात्फलाभावान्न यागस्य फलांगत्वं न वा फलस्य पुरुषांगत्वं। पुरुषस्य तु कर्तृत्वेनान्वयाद्यागांगत्वमित्यभिप्रेत्योपसंहर
ति। अत इति। तदर्थेयीति। मक्षिकानिवृत्त्यर्थे धूमे मक्षिकार्थो धूम इति प्रतीतेः परार्थत्वे विद्यमानेपि मक्षिकाशेषत्वव्यवहा
राभावादपकारकत्वाद्व्रतमुपकारकत्वमेव शेषत्वं तच्च यत्र प्रत्यक्षादिनावगम्यते तत्रैव संभवतीति नियागादेर्लक्ष्य
त्वमित्यर्थः। लिंगेनेति। सामर्थ्येनावघातस्याभाव उपकारकत्वासंभवेपीत्यर्थः। श्रुतीति। व्रीहीनिति द्वितीयाश्रुतिः। तदंत
पदस्य प्रोक्षतीतिपदेन समभिव्याहारेण वाक्यताप्यामित्यर्थः। तेषामेवेति। एवकारेण यागस्य प्रयाजादेर्वा प्रत्यक्षद्वितीयावा
क्याभ्यामुपकारकत्वादर्शनाद्लक्ष्यत्वं सूचितं। अत एव। वाक्यादिति। करणत्वबोधकतृतीयाद्यभावेन वाक्यादित्युक्तं
प्रयाजादेरंगत्वसिद्धेः प्रकरणस्याप्युपलक्षणं। इष्टविशेषेति। अत एवापेक्षा। तेष्टविशेषसमर्पकमेव स्वर्गकामपदं लक्ष
णया स्वर्गोद्देश्यभाव्यपरं न कर्तृपरं। आयाततः प्रतीयमानकर्तृपरत्वपदेन समर्पणानुपपद्यते एककर्मकत्वानुरोधादित्यर्थः
प्रमाणासत्त्वेपीति। यथाजातेष्टेपूत एव सत्तेजस्वीत्याद्युपसंहारैकवाक्यतारूपप्रमाणसत्त्वे पुत्रस्येत्यर्थः। भाक्त इति। भो

अ॰पा॰आ॰ क्रतुः प्रवृत्तपुरुषपिस्यापरत्वाभावादुद्देश्यतयान्वयायोग्यत्वाच्च तदुद्देशप्रवृत्तकृतिकर्मत्वस्य मुख्यांगत्वासंभवाद्गौक्त
४ इत्यर्थः। कर्मत्वादिनेति। आदिपदेनौदुंबरीसमानादिषु साधनत्वेन कारकतासंग्रहः। पूर्वपक्षेपि वादरिणा द्रव्याणां
शेषत्वस्यांगीकारात्पुरुषस्य द्रव्यत्वेनांगत्वेनोभयोर्विवाद इति पुरुषश्चकर्मार्थत्वादिति पुनःसूत्रपरायणनैवैष्प्यमवि
वादमेवेत्यनेन सूचितं। प्रयोजनं पूर्वपक्षे प्रयाजादीनामंगत्वे प्रकरणादिप्रमाणाभावादर्थवादिकस्य स्वर्गा
स्वाफलत्वकल्पनपापाधान्यान्नातिदेशः। सिद्धांतेतु सद्धतिस्पष्टत्वान्नोक्तं तेषां। अत्र प्राथम्याच्छ्रुतिविनियो
त गोपयोगिनिरूपणस्य प्रथमपादार्थत्वमभिप्रेत्य तृतीयप्रतिज्ञा विषयीभूतार्थनिरूपणाय प्रथमांतः श्रुति
लक्षणामाह तत्रेति। अत एव प्रोक्षिताभ्यामिति। प्रोक्षिताभ्यामिति निष्ठाप्रत्ययेन कर्मत्वविशिष्टोलूखलमुशल
रूपद्रव्याभिधानेन मासान्नाधान्येन तत्पुरुषपतायान्वबोधनाच्च श्रुत्या प्रोक्षणस्य तदंगत्वमपि तु वाक्याद्वं
वारयावाकेप्यव स्वर्थेतेऽनुष्टीयतेऽनेनेति व्युत्पत्त्या पत्नसाधनत्वबोधनादित्यर्थः। तदुद्देशप्रवृत्तकृतिकारकत्वरू ५
पपारार्थ्यबोधनेनोद्देश्यस्य प्राधान्यात्तत्प्रतिपादकद्वितीयाश्रुतिकृतोपारार्थ्ये व्यवस्थाव्यवस्थेपि विचारपितुं प्रथम
नत्तस्याः पारार्थ्यप्रमोरात्वमुपपादयति। तृतीयेति। तृतीयादिविभक्तिर्थत्परासतीतदर्थस्य कारकतामतिपादने

नान्यांगत्वं वोधयति। द्वितीयातु न स्वप्रकृत्यर्थस्यान्यांगत्ववोधिका किंतु स्वप्रकृत्यर्थस्योद्देश्यतावोधनद्वाराऽन्यार्थस्य विधे
यतापादनेन करणतातात्पर्येणान्यार्थस्य स्वप्रकृत्यर्थांगत्ववोधिकेति वैषम्येण तस्याः प्रमाणत्वमुपपादयति। उद्देश्य
त्वयणसतीति नैव लक्षणो देयमिति। ननु कृतिकारकत्वस्य प्राधान्येन वाचक इत्येतावद्दत्र क्षणाकरणेपि कर्मत्व। वाचिता
द्वितीयाया मुख्यश्रुतित्वमुपपाद्यत एव। विनियोजकत्वप्रकारमात्रं पूर्वोक्तवैषम्येणास्त्विति चेन्न। अंगत्वालक्षणांउद्देश्य
पदोपादानेन तदतिरिक्तत्वेनैव कृतिकारकत्वस्य विवक्षणात्तस्यास्तत्प्रमाणत्वानुपपत्तेः। अत एवांगत्वघटकीभूतेत्यपिनि
वेशितं। युक्तं चैतत्। नहि यस्य प्रोक्षणादेः करणत्वेन व्रीह्यंगत्वं वोध्यं तेन तत्प्रमाणं द्वितीयाभवति। तस्याः स्वप्रकृत्यर्थ
स्योद्देश्यतामात्रवोधकत्वात्। अत स्तदंतपदसमभिव्याहाररूपवाक्यगम्यमेव तत्रांगत्वं। द्वितीयायां तु श्रुतित्वेन पूर्वोक्तवि
नियोजकताप्रामाण्यव्यवहारस्तु सत्यपि श्रुतयदसंनिधिरूपे व्रीक्ष्येत्वेगत्वघटकीभूतोद्देश्यताकृतिकारकत्ववोचकप
दत्वनानुकूलत्वाभावसाम्यमात्रेण भाक्तः। स्तत्प्रयोजनं च लिंगश्रुत्याधकत्वानेन लिंगापेक्षया प्रावल्यसिद्धिः। अत
एवास्मिन्मते इत्यश्वाभिधानीमादत्ते इत्यत्र सत्यपि वाक्यीये विनियोगे श्रुतित्वेन लिंगवाध उपपद्यते इत्याशयः। एवं प
त्रापीति। यथा प्रयाजशेषेणोत्पत्रद्वितीयातृतीयाविभक्त्योर्लक्षणया हविषामधिकरणत्वेनांगत्वं तथा प्रयाजशेषांग

त्वमभिधारणस्य तत्रेत्यर्थः। एवमितियत्तु भास्द्वालंकारे शेषिशेषत्वाभिमतयोस्तत्तद्रूपेणोपस्थितयोः संबंधज्ञानं व्यवधान
६ मनपेक्ष्य यच्छब्दज्ञानेन जन्यते सा विनियोक्त्री श्रुतिरिति श्रुतिलक्षणं कृत्वा संबंधश्चांगत्वात्मनासाधनत्वात्मना
संबंधात्मना वाचीप्रतीयतां न तद्विशेषालक्षणेऽपेक्ष्यते तेन तृतीयाषष्ठीपदश्रुत्यादीनां संग्रह इत्युक्तं। तत्रपदा
र्थोपस्थितिविलंबकृतिव्यवधानाभावविवक्षणं तदा यागस्य स्वर्गसंबंधेऽपूर्वोपस्थितिकृतविलंबकृतव्यवधानसापे
क्षणात्तदा यागस्य स्वर्गसंबंधेऽपूर्वोपस्थितिकृतविलंबकृत। व्यवधानसापेक्षत्वान्न हि नियोजकपदश्रुतताव्याप्तिः
यदि तु शब्दांतरोपस्थितार्थप्रतीतिविलंबकृततदभावविवक्षणं तदा आरुणपस्यैकहायनीशब्दांतरोपस्थितगो
रूपार्थपरिच्छेदद्वारकव्यवधानापेक्षत्वात्क्रय्यांगत्वविनियोजकश्रुतताव्याप्तिरित्युक्तं। अत एवैतादृशव्यवधानस
त्वेपि पत्रशक्त्या कारकत्वबोधकत्वं तत्र श्रुतित्वं यत्र तु न तत्र गौणश्रुतित्वमित्यभिप्रेत्यंगीकारेणो वारुणपादीनां क्र
यांगत्वमुख्यश्रुत्या यागस्य स्वर्गांगत्वं गौणश्रुत्येति पूज्यपादानामभिप्रेतमिति दिक्। तदेवं श्रुतेरितिरावंलक्षणाल
क्षितापामुख्यश्रुते गौणश्रुतेश्चेत्यर्थः। तद्भूतेति। तर्कपादे वाक्यगतकारकवाचिपदार्थानां क्रियोच यस्य तद्भूता ६
नां क्रियायाच यस्य तद्भूतार्थेन समाम्नाय इति सूत्रेण प्रतिपादना छत्वा क्रियानिरूपितकारकत्वस्यार्थादेवोपपत्तेः प्र

तिविनियोजकत्वे सिद्ध इत्यर्थः। अंगांगित्वयोरिति। यद्यप्येतत्प्रभृत्यंगितावच्छेदकमेव विचारयिष्यते नांगतावच्छेदकं तथा।
पि अंगितावच्छेदके निरूपिते तादृशोद्देश्यतावच्छेदकरूपावच्छिन्नोद्देश्यप्रवृत्तकृतिकारकत्वमेव तन्निरूपितांगतावच्छेदक
मित्यस्यार्थोत्सिद्धिमभिप्रेत्योपन्यासः। इत्यादपद इति। आदिपदेन सामान्याधर्माणां दोहनादीनां च नादीनां संग्रहः। एवमन्य
त्रापीति। सोमप्रकरणगताभिषवादिधर्मेष्वपीत्यर्थः। कथं च विनियुज्यत इति प्रतिज्ञाया आज्यादिव्यावृत्तरूपावच्छिन्नोद्दे
शेन विनियुज्यत इति सिद्धांतेन निराकांक्षीकरणात्तद्वैपरीत्ये न पूर्वपक्षे माहांतत्रेति। न च फलजनकतया सिद्धवैजात्या
वच्छिन्नव्यक्तं च तद्गतत्वात्तदवच्छिन्नं प्रति च द्रव्यत्वावच्छिन्नस्य लोकतरावकारणत्वावगते व्रीह्यादिद्रव्यं विनापि द्रव्यां
तरेणाविजातीययागोत्पत्तिर्बाधकाभावेनावश्यं अंगीकार्यत्वात्तदुत्पत्तौ सुतरां तत्संस्कारापेक्षायां मानाभावेनानर्थकस्तद
वस्थत्वादपूर्वसाधनत्वलक्षणमावश्यकी तदा च विशेषणीभूतापूर्वं प्रत्यर्थाज्जनकत्वावगमात्तस्य चादृष्टरूपस्य
एतत्संस्कारैर्विनोत्पत्तौ मानाभावादानर्थक्यपरिहारसंभवात्तादृशापूर्वसाधनत्वस्य प्रदेयघटकतया लक्षणापस्येरूपस्य
पूर्वेष्विवाज्यादिष्वपि सत्वात्सर्वांगं धर्मा इत्यर्थः। न चैवमपूर्वसाधनत्वलक्षणायामपि व्रीहि जन्यत्वेन प्रत्यासत्त्यांगेनपा
वांतरापूर्वसाधनत्वस्यैव लक्षणौचित्यात्तदसाधनाज्यादिष्वप्राप्तिरित्यत आह। तत्र फलेति। प्रत्यासत्ते राग्नेयचद्वा

षोमी। येनं द्वयोरप्यविशिष्टत्वेन तदर्थपूर्वसाधनत्वस्यापि लक्षणीयत्वत्रितयवृत्त्येकानुगतधर्माभावेनावांतरापूर्वसा
८ धनत्वविशेषलक्षणानुपपत्तेः फलप्रत्यासन्नत्वात्सर्वानुगतपरमापूर्वसाधनत्व एव लक्षणाया धर्मसांकर्यमनिवा
र्यमित्यर्थः। दीक्षणीयायो ~~ज्योतिष्टोमापूर्वसाधनत्वा~~ दृष्टे नविहितस्य वाङ्नियमस्य दीक्षणीयायाः ज्योतिष्टोमापूर्वसा
धनत्वाभावे मदीक्षणीयापदेन तस्य लक्षयितुमशक्यत्वाद्दीक्षणीयापदेन स्वसाध्यापूर्वसाधनत्वलक्षणायां तत्तोऽध्य
7 ज्योतिष्टोमापूर्वसाधनत्वलक्षणायां लक्षितलक्षणापत्तेस्तदर्थत्वमंगीकृतमपि तु दीक्षणीयावांतरापूर्वार्थत्वमेव॥
प्रकृते तु व्रीहिजन्ययागजन्यत्वस्य परमापूर्वेपि सत्वेन व्रीहिपदेन तल्लक्षणामात्रोपपत्तेर्नावांतरापूर्वार्थत्वमित्यभि
प्रेत्य वैषम्यमाह। अत एवेति। दृष्टार्थत्वेति। अवघातस्य अपूर्वार्थत्वेपि तत्साधनव्रीहिगतदृष्टप्रयोजनद्वारैव तदर्थ
त्वमिति व्रीह्यर्थत्वे वैतुष्यरूपदृष्टार्थत्वमाज्याद्यंशे ऽदृष्टार्थत्वमिति वैरूप्यस्य तथा वैतुष्यार्थत्वे ऽवघातविधेर्निय
मविधित्वमदृष्टार्थत्वे त्वपूर्वविधित्वमिति वैरूप्यस्य चापत्तेस्तत्परीहारायैकरूप्याय परोलाघवान्नियमविधित्वदृष्टा
र्थत्वानुरोधेनोषधवृत्त्यपूर्वसाधनत्वमेव लक्षयित्वा तद्धर्मत्वमेवमुक्तमित्यर्थः। नचाविशेषप्रवृत्तविध्यनुरोधेन वै
रूप्यांगाकरणे सर्वत्रैववाऽदृष्टार्थत्वामंगीकरणं न दोषइत्यत आह। किमुतेति। प्रत्यासत्येति। व्राहिपदाभिधेया

र्थस्यव्रीह्यादेस्तंडुलनिष्पत्तिद्वाराप्रथमतःपुरोडाशसंपादनेनोत्पत्त्यपूर्वसाधनत्वात्तदतिक्रमेणाकारणाभावाद्येदेव
व्रीह्यादिभिःसाध्यमपूर्वंतत्साधनत्वस्यैवव्रत्यासत्यालक्षणत्वादित्यर्थः।यद्दिकथमपितत्साधनत्वलक्षणायामानर्थक्य
परिहारोनभवेन्नदाऽगत्यातद्विहायपरमापूर्वसाधनत्वंविप्रकृष्टमपिलक्ष्येतनत्वेतदस्ति।तस्याप्यनिर्ज्ञातप्रकारत्वेन
तदर्थत्वेप्यानर्थक्यपरिहारोपपन्नेरित्याह।तस्यापीति।अतएवसप्तदशारत्नित्वादिव्यतिरेकेणप्रकृतौयूपसिद्धिःयै
(श्चपूर्वसिद्धिःपश्चपूर्वसिद्धिर्वीवधारितातत्रतदतिक्रमेणापिपरंपरयावाजपेयापूर्वप्रयोजकत्वमिष्यतएवप्रकृते
तुतदभावात्सत्यादृत्याशक्यंसंबंधानुरोधेनव्रीहित्वसमानाधिकरणगेयाद्युत्पत्त्यपूर्वसांनसंबंधिप्रदेयघटकतंडु
लनिष्पत्तिरूपव्यापारकसाधनताश्रयत्वस्यैवलाघवाल्लक्षणेतिभावः।अंतरालिकतत्तद्व्यापारकसाधनतानिवेशे
नलक्षणाप्रकारंदर्शयति।अतइति।पिष्टरूपव्याख्यानत्तत्थेप्रदेपप्रकृतिभूतेत्युक्तं।तस्यप्रदेयत्वेनतत्प्रकृतित्वाभा
वात्।यथैवत्वाभिक्षापयसोनद्रव्यांतरंकिंतुघनीभावायत्रपय एव।यथावासक्तवएवसक्तवैर्वैसक्तुपिंडोनत्वर्थांत
रं।जलसंयोगादिकंचपिंडभावेनिमित्तकारणमात्रंतथैवजलाद्यादिसंयोगस्यपिंडप्रतिनिमित्तकारणत्वेपिनपि
ष्टादर्थांतरंपुरोडाशः।किंतुपिंडावस्थामात्रं।अतःसतंडुलप्रकृतिकएवेतिनपिष्टस्यव्यापारमध्येप्रवेशः।अत

एवं चरौ पुरोडाशस्यानापत्तेपि प्रकृतित्वाभावेपि तंडुलप्रकृतिकत्वादेव धर्मप्राप्त्यविघातः। एवं पिष्टपिंडेपि पिष्टस्यैव प्र
८ देयता तत्र तंडुलप्रकृतिकत्वेन धर्मप्राप्तिर्दुर्निवारा तथापि सर्वत्रानोवासोधिकरणन्यायेन सिद्धस्यैव पुरोडाशादेर्ग्रहण
प्रसक्तौ प्रयोगांतःश्रवणविध्यन्यथानुपपत्त्या प्रयोगमध्ये संयावदेनावश्यपाकता तत्रैव प्रकृतिद्रव्योपादानेन त्रि
पमविधानात्तादृशानियम्यमानद्रव्येष्वेव धर्माणां विधानं। यत्र तु पिष्टं तंडुलादौ प्रदेयेत श्रपणप्राप्तिस्तत्र पुरोडाशादि
पक्वापक्वपिंडादिघटकपाकप्रयोजनकस्य तदभावे पेषणावघातोपि चिंत्यैनानोवासोवघातौ किंकस्यैव पिष्टतंडु।
लादेरुपादानात्तंडुलेष्विव न पिष्टेपि प्रयोगमध्ये तंडुलोपादानं न वा व्रीहिप्रकृतित्वनियम इति न तद्धर्मप्राप्तिः। अत ए
व व्रीहिभिर्यजेतेति वाक्यस्य प्रदेयप्रकृतितंडुलव्यापारद्वारैव पूर्वसाधनीभूतेन यागोद्देशेन व्रीहीणां करणत्वेन
विधानात्तादृशसाधनताश्रयोद्देशेनैव संस्कारविधय इत्यर्थः। इतोप्यधिकं कौस्तुभे द्रष्टव्यं। ननु तत्तद्व्यापारकसा
धनतानामाश्रयत्वव्रीहित्वावच्छिन्नानां निवेशे सोयोदोत तत्तद्धर्मावच्छिन्नसाधनतानामभावे कथं तद्भिन्नधर्मावच्छिन्न ८
साधनताश्रयेषु धर्मप्राप्तिरित्यत आह। तत्तद्व्यापारकेति। यावता विना नानर्थक्यपरिहारस्तावन्मात्रस्यागत्या प्र
वेशेपीह साधनतामात्रप्रवेशेन तत्परिहारोपपत्तेर्न तदवच्छेदकानां व्रीहित्वादीनां प्रवेशे गौरवादिति प्रसंगवा

रणस्यापि तावतैव संभवाद्वचनैवार्थ्ये चातौ पर्वेषु च धर्मप्राप्तेर्विकल्पे त्वर्थः। ननु व्रीहियवयोः शब्दान्तरानुगुणाद्यकारणताया
प्राकृतकार्यापत्त्या तदवच्छिन्नेषु निवारेषु त्रिदेशेन धर्मलाभेपि प्रकृते तदभावेन कथमपि तत्प्राप्तिरित्यत आह। यथा चे
ति यथैव साधनतामात्रविवक्षायामानर्थक्यपरिहारे सति न साधनतावच्छेदकविवक्षागौरवादेवं साधनतासामान्यवि
वक्षयापि तत्परिहारे उपपन्ने स्तुल्यत्वेन शक्यसंबंधविधया प्रविष्टस्यापि न साधनताविशेषस्य विवक्षया लक्ष्यतावच्छे
दकेप्रवेशे गौरवादिति साधनतासामान्याश्रयत्वविवक्षयाप्युक्तोपर्वेषु धर्मप्राप्तिर्नान्यादिष्विति कौस्तुभे विस्तर इत्यर्थः
। प्रयोजनं स्पष्टत्वान्नोक्तं। द्रव्यं। पूर्वाधिकरणमारभ्यात्रिष्वधिकरणेषु संस्कारद्रव्यगुणानामुद्देश्यतावच्छेदकनिरूप
णेन विनियोगप्रकारे निरूपयितव्ये पारार्थ्यघटकोद्देश्यतावच्छेदकत्वेन प्राधान्याच्छिन्नाया श्रुतिकृतविनियोगप्रकारं पूर्वा
धिकरणे निरूप्याधुना तन्नायाश्रुतिकृतविनियोगप्रकारं द्रव्यविषये निरूपयितुमुदाहरति दर्शपूर्णमासयोरिति। प्राक
रणिकसर्वयागद्रव्यमात्रे निवेशः पूर्वपक्षः साधकतया दर्शपूर्णमासयोरित्युक्तं। इति करणेन प्रभृत्यर्थकेन चाग्नि
होत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चेत्येतस्य संग्रहः। स्फ्येनोद्धन्तीत्यादीनां
विधित्वेन स्फ्यादीनामुद्धननादिषु विनियोगेपि पूर्वन्यायातिप्रसक्तत्वस्मरणायां प्रमाणाभावाद्व्रीहिमात्रजन्यव्यापार

कसाधनतात्वसणायामपीहयज्ञायुधवाक्यस्यतात्पर्यमाह कस्यसत्वादितिप्रसक्तलक्षणायेनवाधकमितिविशेषांशंका
निरासायपुनरारंभमभिप्रेत्यपूर्वपक्षमाह।दशानामपातिवैशब्दोयवद्धस्याप्यस्याप्रसार्थत्वात्कर्तव्यतावाचिपदाध्या
हारेणाविधायकत्वमभिप्रेत्यविधानादित्युक्तं।अपुधशावकस्यपुधसाधनवाचिनोपियज्ञपदानुरोधात्साधनमात्र
परत्वलक्षणायासाधनत्वेनेत्युक्तं।स्फ्येनाद्धतीत्यादीति।आदिपदेनकपालेषुश्रपयति।अग्निहोत्रहवण्याहविर्वापि
निर्वपति।शूर्पेणाविविनक्ति।कृष्णाजिनमधस्ताडुलूखलमवस्तृणाति।शम्यांदृषदुपदधाति।उलूखलमुसलाभ्या
मवहंति।दृषदुपलाभ्यांपिनष्टीत्येतेषांसंग्रहः।इतरेत्यस्यष्टार्थे।इहस्फादीनांसर्वार्थत्वेनिराकृतेचनुर्थेपुनस्ते
षांप्रदेपत्वमाशंक्यनिराक्रियतेइतिनविरोधः।उभयपक्षाप्येऽवराधिकरणासिद्धार्थवादत्वंयज्ञायुधवाक्यस्याभिप्रेता
नुवादत्वोक्तिरितिध्येयं।प्रयीजनंस्यष्टत्वान्नोक्तं॥अथैकत्वे।पूर्वद्रव्यविषयेविनियोगप्रकारंनिरूपयितुमुदाहरति
।ज्योतिष्टोमेइति।पूर्ववत्पूर्वपक्षेसिध्दौपयिकतत्पज्योतिष्टोमइत्युक्तं।अरुणाशब्दस्यद्रव्यपरत्वेद्रव्यस्यक्रीणा
त्वचयोपपत्तेःपूर्वपक्षासंभवंनिरासितुंगुणवचनत्वंसाधयतितित्रेति।नचारुणास्तत्वमक्तिनानात्वपक्षेआरुत्याधि
करणान्यायेतारुणात्वजातिवचनस्तदेकपक्षेगुणगुणवचनइत्यर्थः।ननुविशिष्टद्रव्यवचनइत्यारुत्यधिक

४ प्याधुनागुणविषयेतंनिरू

रुणान्पायप्रवृत्तिप्रदर्शनार्थं। अत्र प्राचीनैररुणादिशब्दानां केवलं गुणवाचित्वे शुक्लो देवदत्त इतिवदरुणो घट इति सामानं
निरूढलक्षणायाद्रव्यपरत्वमपि। अत एव गुणवचने भ्योमतुपो लुगिष्ट इति मतुब्लोपानुशासनमपि मतुलोपमजानतां
मपि मतुल्ले द्रव्यप्रतीते निरूढलक्षणानात्पर्यग्राहकमेव। न चैतावता लक्षणायारूपो घट इति प्रयोगापत्तिः तत्र प्रयोगाभा
वेन सांप्रतिकलक्षणाया अनुपपत्तेर्निरूढलक्षणायाः सुतरामनुपपत्तेः। तदुक्तं वार्त्तिके निरूढलक्षणाः काश्चित्साम
र्थ्यादभिधानवत्। क्रियंते सांप्रतं काश्चित्काश्चिचैव त्वशक्तित इति। अत एव विशिष्टद्रव्यवाचित्वे पर्यैव शुक्लादिपदा
नामेव तद्वाचित्वं न रूपादिशब्दानामप्रयोगादेवं गुणमात्रवाचित्वेपि तेष्वेव द्रव्यलक्षणानान्यत्रेति नियमोपपत्तेर्द्रव्येल
गुणव५ क्षणायासामानाधिकरण्योपपत्तिर्वा इति प्रसंगः। अत एवं च तत्वे पुंस्त्रिगताद्रव्यवर्तित्वे आश्रयलिंगवचनतेत्यर्थ न५
तो४ कं गुणवचनानामाश्रयतो लिंगवचनानि भवंतीत्यनुशासनांतरमुपपद्यते गुणवचनत्वमपि विशेषणत्वेन गुणशक्य
त्वपरं द्रष्टव्यं। इत्थमरुणापदस्य द्रव्यपरत्वमुक्तमयुक्तमिति सूचयन्तस्यांगीकारे निष्प्रयोजनतां दर्शयति। ततीयये
ति। अयमर्थः किं द्रव्यलक्षणाकारणं त्वान्वयानुपपत्त्योतलिंगसंख्यान्वयानुपपत्त्या वा नाद्यः। जातेरिव गुणस्यापि द्र
व्यपरिच्छेदद्वारा तदुपपत्तेरनुपपत्त्यभावात्। अत एव क्रियाजन्यफलशालित्वरूपकर्मत्वसंप्रदानत्वस्योरुनत्ववि

प्रजत्वद्वृत्तित्वासंभवस्तत्रैव तल्लक्षणाननुवर्त्तनीयं तादिस्थले द्रव्युक्तमात्रस्य धिकरणो। नांत्यः। तस्यपाशाधिकरणान्या
१० येन साधुत्वमात्रे ऽणा अयनिष्टत्वावोपपत्तौ प्रातिपदिकेलक्षणायां प्रमाणाभावात्। अत एव सामानाधिकरणपसंबं
धेनन यो: करणत्वेप्रातिपदिकार्थेवाचये संसर्गविधयापार्ष्टिकभानेन च द्रव्यबोधोपपत्तेर्नैव लक्षणायां तत्रप्र
योजनं दृतीयां तादिस्थले तद्द्रव्यरूपकत्वेपाहत्तनीयं तेतत्प्रयोजनाभावात्। पचेतादृशस्थले पितल्लक्षणांगी
क्रियतेतदा विशेष्ये द्रव्ये गुणस्यान्वयापत्त्यातद्विशिष्टद्रव्यस्य मूर्त्तेनयेकदापन्यादिवत्पार्ष्टिकान्वयपलभ्याभे·दसंब
धेन क्रयणाव निवेशोपपत्ते: प्रत्युतसमस्य मानानेकपदत्वसामानाधिकरणपालोचनापेक्षा धिक्येन विलंबि
तत्वात्तेन द्रव्यविध्यनापत्तेर्गुणशब्दे नैवद्रव्यविध्यापत्ते: क्रयसाधनत्वेन निवेशस्यैवोपपन्नावमूर्त्तत्त्वाक्रये द्रव्य
तन्निवेशासंभवेन प्राकरणिकयोगपकारकमात्रनिवेशपूर्वपक्षासंभवेनसमाधानार्थोधिकरणारंभस्य सिद्धांते
गुणस्यैव द्रव्यपरिच्छेदद्वाराकरणत्वप्रतिपादनस्य चवैयर्थ्यापत्तिस्तथाचतुरादिशब्दानामपि संख्याविशिष्टमु १०
ष्टिपरत्वापत्तौ जघन्यस्यापि मुष्टे: प्रधानत्वेनतदनुरोधस्यैवापत्तौ मुख्यत्वेनसप्तदशशरावेच्चरौ संख्यानुग्रहस्य वक्ष्य
माणस्यानापत्तिः श्वेतत्वतो गुणमात्रपरत्वमेवेति। अमुत्यत्यापत्तेरिति। लिंगसंख्यादीनां विशेष्यकारकेसामानाधिकर

णपसंबंधेनस्वाश्रयपरिच्छेदकत्वमित्वसंबंधेननामार्थप्रकारकव्युत्पत्तेस्त्यागेन द्रव्ये ऽन्वयांगीकारेणाद्रव्यलक्षणायांवाव्युत्पत्त्यंत
रकल्पनापत्तेरित्यर्थः। ननु केवलगुणवाचित्वे कथंगुणवचने भ्योमतुपो लुगित्यनेनगुणवचनामाश्रयात इत्यनुशासनद्व
यस्योपपत्तिः। तत्रगुणिनमुक्त्वागुणवाचकायेतेषामेवशुक्लादिशब्दानांगुणवचनेपदेनग्रहणेनगुणेनुक्तिपरत्वा गु
वश्यकत्वादित्यत आह। यथाचैवमिति। आद्यानुशासनस्यपत्रलक्षणाप्रसक्तिस्तत्परत्वं। द्वितीयस्यशक्यार्थविशि
ष्टव्यक्तिविषयकलक्षणावृत्तियोग्यंपयन्मकारतयाव्यक्त्यन्वयप्रार्थकंपदंतस्यैवगुणवचनशब्देनोपादानमितिद्वयोरनु
शासनयोरुपपत्तिः। अत्रयोग्यंतमात्रविवक्षायांप्रजायाःशुक्लइत्यादावपिरावाद्यापत्तिस्तस्यतदालक्षकत्वाभावे
प्परणस्यदृढवद्योग्यत्वस्यसत्वात्। अतस्तद्धावृत्त्यर्थमत्वीअतएवतत्राश्रयगतलिंगाभावेमुक्तादयःपुंसीत्यनेन गुणे
साधुत्वार्थेपुल्लिंगमेवनियम्यते। रूपमस्तीत्यादेप्रकारतयाद्रव्यान्वयाद्याघांतत्रतादृशयोग्यतायाअभावात्। अत
श्चव्यक्तिलक्षणाभावेपियल्लिंगद्रव्यपरिच्छेदद्वारागुणस्यकरणात्वंतद्भूतस्त्रीत्वेनैवटावाद्युत्पत्तेवरूपशब्दस्या
वगुणपरत्वमेवेतिकोस्तुभेद्रष्टव्यमित्यर्थः। एतच्चारूणैकहायनीशब्दयोःप्राधीनोवेलक्षिणायनिरासतात्पर्यमात्रे
णाद्रष्टव्यं। वस्तुतस्तुपचतीत्यत्रैकत्वस्यसामानाधिकरणपसंबंधेनभावनान्वयेसंसर्गविधयाभानरस्यकर्तुःपचतीस

तावच्छेदकविशिष्टधर्मिज्ञानाव १

स्मादेकोनवेतिसंशयव्युदासस्सिद्धधर्मिनावैश्यकत्वापत्तेर्लक्षणातत्रपूज्यपादैरुक्तानथेहाप्यलक्षणापदज्ञायमानसं
११ शयव्युदासायद्रव्यलक्षणावश्यकेवानावत्तापिद्रव्यत्वप्रकारणतयाप्रासेविशेषणांशस्यगुणत्वावश्यकत्वेतत्रामूर्त
त्वादिनाक्रियानन्वयमापाद्ययथापूर्वपक्षस्तथैकद्रव्यत्वादिपदयोरप्यविशिष्टएवसइतिध्येयं।यत्वरूपत्वजा
तिवचनत्वेतयासहगुणेसमवायसंबंधसंभवेनलक्षणायागुणपरत्वसंभवेपिद्रव्येतदभावेव्यक्तिलक्षणानुपपत्त्या
द्रव्यपरत्वेणानुपपत्तिरितिसोमनाथोपेडुक्तंतत्रमनोहरं।नीलोघटइत्यादिसामानाधिकरण्यप्रतीतौनीलपद
स्यनीलरूपाश्रयद्रव्यसंयुक्तत्वसंबंधेननीलपदेव्यक्तिलक्षणावदिहापिस्वाश्रयसमवायसंबंधेनजातिपरस्या
पिलक्षणायातदुपपत्तेःसमानत्वात्।अतएवनीलंरूपमितिप्रतीतेर्नीलत्वजातेःसमवायेनविद्यमानायाप्रवृत्ति
निमित्तत्वाश्रयणांतथैवतस्याएवजातेःपरंपरासंबंधेनघटादावप्यंगीकारेबाधकाभावेनमुख्ययैववृत्त्याप्र १०
योगउपपादितोनक्षत्रवादावल्यांमीमांसकमूर्धन्येन।तदाकोदोषःपरंपरासंबंधेनलक्षणाश्रयणेइति
दिक्।अत्रसूत्रेद्रव्यगुणयोरेककर्म्यादिसुपादानादावश्यकंपिंगाख्यादिशब्दानांद्रव्यपरत्वमुपपादयितुंमत्वर्थत्वे
नवहुव्रीहिर्द्वयाभिधानेनैवांतरालिकासंबंधमानसिद्धेरलमप्यलेनतत्रशक्तिमकल्पयित्वाद्रव्यपरत्वमेवमनुप

इव वहुव्रीहिरप्याश्रीयते। तदुक्तं वार्त्तिके। सर्वत्रयौगिकैः शब्दैर्द्रव्यमेवाभिधीयते। न हि सत्वं धवाद्यत्वं संभवत्यति
गोरखादिति। तत्रापि चित्रगुरित्येवमादिषु चित्रगोशब्दयोरत्यंतव्यतिरिक्तार्थाभिधायित्वाद्देवदत्तादिपदैः सा
मानाधिकरण्यायोगात्प्रागपि देवदत्तादिपदादन्यपदार्थप्रतीतेर्वाक्यार्थत्वासम्भवेनान्यपदार्थे शक्तिरेव।
लक्षणापक्षे वहुव्रीहेररुणोशब्दस्य चैकांतरितद्रव्यलक्षकत्वाविशेषे हि किं विनिगमकं यद्वहुव्रीहेरेव द्रव्य
विधापि नानारुणापदस्येति अतोन्यपदार्थे शक्तिः। न चैवं पीतशब्दे तत्पुरुषाश्रयणापूर्वपक्षे वहुव्रीहावन्यप
दार्थलक्षणापत्तिदूषणाप्रसक्तेः षष्ठीतत्पुरुषापेक्षापेक्षपादौर्बल्यासंभवेन कथं पूर्वपक्षोत्थानमिति वाच्यं ष
ष्ठीतत्पुरुषे वहुव्रीहौ चैकस्यैवोत्तरपदार्थस्य वाक्यार्थेन्वयसाम्येपि षष्ठीतत्पुरुषे एकस्यैव त्यागो वहुव्रीहौ तू
भयोरिति वैषम्येण तदपेक्षया तस्य दौर्बल्यसिद्धेः। एतेन वहुव्रीहावन्यपदार्थस्य शक्यत्वे विधाप्रयुक्तस्य भावकृता
लाघववात्कर्मधारयत्यागेन वहुव्रीह्याश्रयणायत्तिरित्यप्यपास्तं। कर्मधारये अकृतपदार्थानां सर्वेषामेव वा
क्यार्थेन्वयाद्वहुव्रीहावेकैकस्यात्यये वैषम्यमात्रेणादौर्बल्योपपत्तेः। अतो यद्यपि चित्रगावो यस्येति विग्रहो
लोके प्रसिद्धस्तथापि राजपुरुषइतिवदिति षष्ठीतत्पुरुषे षष्ठ्यंतप्रतिपाद्ये उपसर्जनत्वस्य प्रथमान्तप्रतिपाद्य।

र्थे प्रधानत्वस्यैव प्रथमं तन्निर्दिष्टानां चित्रगवीनामेव प्राधान्यापत्त्याऽन्यपदार्थे द्रव्यप्राधान्यप्रतीतिभंगापत्ते श्चि
त्रा गांगवामयमित्येव विग्रहे एतान्यपदार्थे शक्तिरेकहायन्यादिशब्दानां बहुव्रीहित्वाद्व्यपरत्वमिति प्राचीम
तमाह । एकहायन्यादीति । इत्थं हि तादृशस्थले एकेनैवेतरस्याक्षेपसिद्धेरेवानेकशक्तिकल्पनापरिहाराय प्रधा
नेनैव गुणभूतस्य लोके आक्षेपदर्शनाल्लिंगसंख्याचययोग्यद्रव्यस्यैव सत्त्वपदवाच्यत्वेन प्राधान्यात्तत्रैव
12 शक्तिर्न विशेषणीभूते संबंधे । तस्याक्षेपादेव भानसिद्धेः । अत एव तृतीयान्ते जातेर्हि जीयांतादिस्थले च व्यक्ते
श्च प्राधान्यदर्शनान्नियामकाभावे आकृत्यधिकरणन्यायेन प्रवृत्त्या जातेरेव वाच्यत्वं व्यक्तेराक्षेपलभ्यत्वमे
व एवं च कृदंतादिषु न विशेषणे शक्तिरपि तु द्रव्य एव । अत एव सर्वत्रेति वार्तिकेऽप्येतादृशविषय एव वि
शेषणीभूतसंबंधादिशक्तिनिराकरणपरं सर्वत्र यौगिकस्थले कृदादिवाचकांतरसत्त्वं तद्विषयमेव
। यत्र तु न बहुव्रीह्यादौ वाचकांतरसत्त्वं तत्र षष्ठीः प्रवेशयेत्यादावविवपदद्वयस्यैव स्वार्थविशिष्टान्यपदा
र्थेऽन्यपदार्थमात्रे वा निरूढलक्षणोपपत्ताववतिरिक्तशक्तिकल्पने मानाभावः । अनन्यलभ्यस्य शब्दा
र्थत्वात् । अत एव यत्र कदाचिदपि प्रकृतिप्रत्ययादेर्लोपः यथोद्भिद्धृधुनेत्यादौ तत्रावशिष्टभागस्य त

च्छेक्षकत्वमिष्टमेव। नत्वतिरि का शक्तिः। नच बहुव्रीहेरन्यपदार्थे शक्तत्वाभावे आरुणापदाद्विशेषायत्या सूत्रे
द्रव्यगुणयोरितिनिर्देशानुपपत्तिः। अस्मन्मते निरूढलक्षणा तदभावाभ्यामेव विशेषसिद्धेः। एवंच यदद्रूपेलक्षणां
गीकारादेव तत्पुरुषापेक्षया सुतरां कर्मधारयापेक्षया दौर्वल्यं सिद्धं भवति। अत एवेदं द्रूपीताधिकरणे पूर्वपक्षप्र
साधनाय बहुव्रीहावन्यपदार्थलक्षणापत्तिः सिद्धांते दर्शिता सिद्धांतेपि च शक्त्या परिहारमनभिधाय हुताहुतस
मुदायवाचिमइदंद्रूपीतशब्दस्य तदवयवे लक्षणापत्तिमात्रमेव पूर्वपक्षदूषणत्वेन दर्शितमिति नैय्यायिकादि
बहुसंमतं पक्षांतरमाह। अन्यपदार्थे इति। यत्तु प्रकाशकारैर्बहुव्रीहावन्यपदार्थलक्षणायां पंकजादिपदेष्वपित
दापत्तौ योगरूढ्युच्छेदप्रसंगात्तद्वदिहापि शक्तिरेवोक्तं तद्दूषणा कौस्तुभदूषणं वस्तुतस्तु अरुणापदवदे
वैकहायन्यादिपदानामपि आकृत्यधिकरणन्यायेनैकहायनादिरूपविशेषणवाचित्वमेव। तस्याप्यारुण एव
द्रव्यपरिच्छेदद्वाराकरणत्वोपपत्तेरत एव पत्रद्वितीयांतादिस्थले तदसंभवस्तत्परमेव मतुलोपानुशासनवद्बहु
व्रीह्यनुशासनमितिन द्रव्ये शक्तिर्लक्षणा वास्वीकार्या सौत्रं द्रव्यपदं च प्रमाणांतरप्रमितद्रव्यपार्ष्णिकसंबंध
प्रतिपादनपरतयाप्युपपन्नमित्यभिप्रेत्य मिप्रेत्वसंमतं पक्षांतरमाह। शाक्यतेत्विति। प्रमाणांतरप्रमितेति।

गवातेक्षीणानीतिमंत्रलिंगावगतगोरूपद्रव्यमादायेत्यर्थः। अस्मिंश्च पक्षेऽमूर्तत्वाविशेषात्सर्वेषामेव विचारवि
२ षयतेतिभावः। एवं प्रकृतविचारोपयुक्तं प्रसाध्य शाब्दबोधत्वावच्छिन्नं प्रतियोग्यताज्ञानस्य हेतुत्वादमूर्तस्यारु
णस्य क्रयभावनान्वयायोग्यत्वात्तत्रानिवेशो वाक्यान्वयं बाधित्वा विहितस्तु सर्वे धर्मः स्यात्संयोगतोऽविशेषा
त्प्रकरणविशेषादिति तेषामर्थाधिकरणपूर्वपक्षसूत्रमेव पूर्वपक्षसूत्रत्वेनाश्रित्य प्राकरणिकसर्वद्रव्यार्थत्व
13 पूर्वपक्षं साधयितुं योग्यतया वाक्रीयद्रव्यान्वयसंभवे निरस्यति। तदिहेति। अत्राग्निहोत्रहवण्येतिवाक्यत्पुरु
षकरणीभूतस्य द्रव्यस्य स्रुवाक्योपात्तनिर्वाप्यं प्रतियोग्यतानन्तरं तस्या निर्वाप्यांगत्वसंभवेपीह कारकत्वेन द्रव्ये
ऽमूर्तत्वेन क्रयभावनायां वान्वयासंभवान्न तदंगत्वमपि तु श्रुतिवाक्ययोरौदासीन्ये सत्यधिकारात्स्वप्रकरणो
न ज्योतिष्टोमोपस्थितौ योग्यतया तदीयद्रव्यपरिच्छेदकत्वेन विधिवाक्यं द्रव्यवाचकपदं च प्रकल्प्य तद्विधा
नात्सर्वयोग्यकारकांगत्वमिति तत्केवलं प्राकरणिककरणकारकांगत्वमात्रं किंतु तत्साधारणयेन कत्रादिका
रकांगत्वमपीत्यर्थः। यत्तु वार्त्तिके सिद्धरूपारुणस्य प्रकरणेनाग्रहणमाशंक्यारुणयेति तृतीयया प्राकरणिका
नि ज्योतिष्टोमापूर्वसाधनानि सोमप्रभृतीन्यनूद्यारुणप्रातिपदिकार्थो विधीयते। अत एव पदमेवैतद्वाक्येने

वं विभज्येते। याव्यक्तिः कारणत्वेन चोदिता पूर्वसाधनं। तपत्नाधर्ब्बोन्नत्यमरुणत्वविशिष्टया। एवं चेदरुणाकार्ये कर
णं पङ्ग्वहायपि। यत्तु नर्यजमानादिविहितं कारकांतरं। न तस्यार्थं गुणः शेषः सर्वार्थोप्यवधारितइत्युक्तं। ततृतीयप
लक्षणाया द्रव्योपादाने एकहायन्या एव लक्षणापत्तेः परंपरासंबंधेन स्ववाक्योपात्तक्रयान्वयसंभवादेकप्रसरता
भंगायतेश्चापुक्तमिति। व्याक्तं कौस्तुभे। एतेनैकहायन्यादियदानां द्रव्यपरत्वाभ्युपेत तदत्वरुद्धे क्रये ऽरुणापदल
क्ष्य द्रव्यविध्यसंभव इति शास्त्रदीपिकोक्तमपास्तं। बलाबलेस्त्यपि वस्तुतएकत्वेन विरोधाभावात्। अतः पूर्वो
क्तरीत्यायोग्य सर्वकारकांगत्वमित्यर्थः। न शाब्दबोधत्वावच्छिन्नं प्रतियोग्यताज्ञानस्य कारणत्वं। तदभावेप्ययो
ग्यतानिश्चयाभावदशायां गृहीतपदपदार्थसंकेतस्य शाब्दबोधोदयात्। अन्यथा यागस्यापि स्वर्गान्वयशाब्द
बोधानुदयेनापूर्वकल्पनानापत्तेः। किंत्वयोग्यतानिश्चयः प्रतिबंधकस्तदभावस्य कारणत्वेन प्रकृतेपि तावन्मा
त्रेणाक्रयाभावनायाममूर्तस्याप्यन्वयोपपत्तेस्तदीयद्रव्यांगत्वमेवेत्यभिप्रेत्य सिद्धांतमाह। नयोग्यत्वेति। पश्वा।
न्वेति। आरुणपस्य क्रियान्वयात्पूर्वं द्रव्यान्वये कारकत्वव्याघातापत्तेः प्रथमतो द्रव्यपरिच्छेदरूपव्यापारानवग
मेप्युक्तसामग्रीवशादेकहायनीक्रयसोमादिकारकांतरवदेव भावनया संबंधेसति विशिष्टविधानेन विधे

यानेकत्वकृतवाक्यभेदपरिहारेणायश्चारुण्यस्यसोमनिरूपितकरणत्वबोधदशायांभावनाप्रत्यासन्नत्वादेक
हायनीवन्मत्वर्थलक्षणयाक्रयसंबंधेनद्रव्यसंबंधाभावेपिगुणस्यद्रव्यपरिच्छेदरूपव्यापारमंतरेणाकरणत्वा
निर्वाहायोग्यतयातस्मिन्नवगतेद्रव्यविशेषापेक्षायांसामानाधिकरण्यादेकहायनारूपद्रव्यविशेषप्रतीति
सिद्धेः।अस्तिचद्वयोरपिद्रव्यगुणयोःपरस्पराकांक्षेतिपरस्परसाहित्यरूपोनियमःयद्यपिकेवलगुणवा
चित्वपक्षेभिन्नप्रवृत्तिनिमित्तानांशब्दानामेकस्मिन्नर्थेप्रवृत्त्यसंभवान्नैकहायनीपदसामानाधिकरण्य
14 पसंभवतितथापिमुख्यस्यतस्यासंभवेद्रव्यपरिच्छेदाद्वाराणगुणस्यकरणत्वेनाचयेतस्यगुणिनिष्ठत्वावग
माद्गुणगुणिनोरभेदोपचारेणतत्संभवादुभयोरेकक्रयान्वयेपरस्पराकांक्षयातत्क्रमसाधनैकहायनी
रूपंद्रव्यपरिच्छेदकत्वंनानुपपन्नं।अतएवपार्ष्ठिकान्वयसमर्थनानंतरमेवंचवाक्यगतमपिसामानाधि
करण्यंसमर्थितंभवतीत्युक्तंवार्तिके।अतएवरावंतत्तयाद्रव्यपदसामानाधिकरण्यमपिविशेषणात
यानन्वयंगतयातत्तुविशेषणविधिकल्पनयाक्रय्यंप्रत्येवेत्येवमेकवाक्यत्वसंभवेनवाक्यभेदमंगीकृ
त्याध्याहारादिनाप्राकरणिकसर्वद्रव्यांगत्वकल्पनेयुक्तंनचेतावतांद्रव्योपकारितयाद्रव्यांगत्वंद्रव्यस्यापि

परिच्छेदतया गुणोपकारकत्वेन वैगुपरीत्यस्याप्यापत्तेः ॥ अतः क्रत्वाङ्गत्वाकाङ्क्षाबाधेन क्रय्यांगत्वमेवेति भावः । ए
वं चैकहायनी यत् सामानाधिकरण्यादेकहायनीद्रव्यपरिच्छेदद्वारनियमे सति न क्रयद्रव्यांतरे पुनस्य निवेशः इत्य
हा । अत एवेति । ननु पञ्चमे तेक्रये एकत्वं तन्मते ऽपूर्वसाधनीभूतद्रव्यप्राप्त्यनुकूलव्यापारसाधनत्वाविशेषाद्दास
ःप्रभृतिष्वपि आरुण्य । प्राप्त्यापत्तिरित्याशंकां निरस्यति । नचेति । भिन्ना हीति । अजयारुणीत्यादिवाक्यवि
हितक्रयोद्देशेनारुणावाक्ये ऽनेकगुणविधानेकगुणविधाने वाक्यभेदापत्तेस्तत्र विशिष्टविधंगीकारेण
क्रयोत्पत्तावावश्यिकायां तत्रैकहायन्यवरुद्धे क्रये ज्यादिनिवेशायोगाद्गुणाद्यावद्द्रव्यं भिन्नाः क्रयाः ननु म
हामेश्वरोक्तरीत्यैकः क्रय इति तत्तद्व्यापारकसाधनताभेदान्नैकहायनीधर्मप्राप्तिरित्यर्थः । उत्पत्त्युत्यत्र
शिष्टानामपि गुणानामेकविक्रेत्रानतिवर्तित्समुच्चयोपपत्तौ विरोधाभावान्न भेदकतेति तदुक्तोपपत्ति
माशंक्य निराकरोति । नचेति । अन्यथेतिविकृतदक्षिणाभिः प्राकृतदक्षिणानां प्रसंगबाधोवस्येतेन तत्राश्र
त्विगानतिवशात्समुच्चयोपपत्तौ तदनुपपत्त्यापत्तिरित्यर्थः । नच गुणाक्रयभेदे ऽपि द्रव्याणां धर्मिग्राहक
प्रमाणेन स्वस्वभेदेक्रपेन्यवस्थयानिवेशोप्यारुण्यस्याविरुद्धधर्मोन्तरवदुक्तप्रयोजकसत्त्वाद्द्रव्यांतरे निवे

शोनियार्थइत्याशंक्यपरिहरति।नचरूपभेदेपीति।अविरुद्धधर्मांतराणांतुवाक्यांतरोपात्तत्वादवांतरप्रकरणेन
सर्वक्रयांगत्वमितिविशेषइत्यर्थः।ननुसर्वक्रयद्रव्यस्यानायत्ते त्रिवत्से एकहायनीरूपद्वाराभावादारु
णपप्राप्त्यनापत्तिः प्रकृतावेकहायनीद्वारकत्वस्यविवक्षितत्वात्रहितत्रैकहायन्युद्देश्यायेनतत्स्वरूपमा
नर्थक्यभियानविवक्ष्येतात्तृतीययाक्रयंप्रतिअंगत्वेनतस्याद्वारमात्रत्वात्रहिद्वारस्वरूपेआनर्थक्यं।
द्वाराभावेउद्देश्यसद्भावमात्रेणधर्मप्राप्तौकृष्णलेष्ववघातापत्तिरित्यतआह।यथाचैवमिति।अयम
15
र्थः।द्वारभूतायाअर्थैकहायन्यानैकहायनीत्वेनद्वारताऽदृष्टार्थतायत्तेः किंतुक्रियासाधनद्रव्यत्वेनैव
।अतएवपुरोडाशाभावेपियागांगभूतव्रीहीणांचरुप्रकृतित्वसिद्धिः।किंचाद्वारस्याप्यारुण्यस्यनतत्त्वे
नावच्छेदकताऽपितुप्रकृतक्रियासाधनगुणत्वेन।अतएवश्वेतादिगुणांतरसाध्यक्रयस्यालेप्येकहा
यनीपरिच्छेदकत्वाविरोधस्तत्रकिमुवक्तव्यंद्वारस्यनत्वेवद्वारत्वेतिपुक्ता।तत्रधर्मप्राप्तिरितिकौस्तुभे
द्रष्टव्यमिति।प्रयोजनस्पष्टत्वान्नोक्तं।एकत्वमुक्तं।एवंतावत्त्रिभिरणोः क्रमेणक्रियाद्रव्यगुणानां
श्रुत्याविनियोगप्रकारेनिरूपितेश्रुतिहेतुकसंस्कारचिंतात्वासाम्यात्तेषामर्थाधिकरणानंतरंकर्तुमु

क्तामप्यग्निमचिंतामग्निमचिंतायाविशेषचिंतात्वेनसामान्यापेक्षत्वात्सामान्यचिंतानंतरमेवविशेषचिंतापुक्तेत्यभिप्रायेणोपेक्ष्यावसरसत्वादधुनाकरणेचित्यमभिसंधायाग्निमचिंताविषयवाक्यमुदाहरति। ज्योतिष्टोमेति। उभयत्रादित्यदर्भ्यामग्निहोत्रप्रकरणागतस्याग्नेस्तृणान्यपचिनोतीत्यस्यपुरोडाशेष्वापतोयस्यसर्वाणीहेंवापिनश्येपुरित्यादिद्विवचनवहुवचनांतपदसमर्पितोद्देश्यघटितवाक्यानामपिसंग्रहः सूचितःयत्तुवार्तिकेप्रयाजशेषेणाहविष्यभिघारयतीत्येतदुदाहृतंतन्नचतुर्थेऽभिघारणास्यप्रयाजशेषप्रतिपत्यर्थतायावक्ष्यमाणत्वात्प्रयाजशेषस्योद्देश्यत्वेनहविषामनुद्देश्यत्वादयुक्तमिवतथापिमतभेदेनतदुपादानप्रकारस्तत्रैवोपपादयिष्यतेग्निहूंसमाष्टीत्यस्मात्पूर्वेदशायविचारानुपयोगाद्युपेक्षितस्यापिदर्शापवित्रशब्दस्यवासःकंवलोवार्थस्मात्रज्ञेयः। अत्रग्रहशब्देनकर्मव्युत्पत्यासोमरसाभिधानाद्ग्रहणकालेवहिर्लग्नविप्रुषांप्रोछनरूपःसंमार्गःतत्संस्काराद्दृतिन्यायसुधाकारः। उत्तराधिकरणभाष्यस्वरसाद्धिरधिकरणव्युत्पत्यातदाधारपात्रपरत्वेनतत्संस्कारइतियार्थसारथ्यनुसारिणःप्रकाशकाराः। उद्देश्यतावच्छेदकतेति। संमार्गविनियोगःसिद्धोपिकिमेकत्वादिविशिष्टउतग्रहमात्रेवेतिविशेषतोविनियोगप्रकारेणोतिभाष्येध्वतस्यापिप्रस्तुतवि ५

रेवकव्यस्तत्र यद्यथापूर्वं साधनत्वेनैव रूपेणो विनियोगस्तथापि तद्द्वारकरणोपयोगिशक्यसंबंधघटकताः घटकता
मात्रमेवोद्देश्यतावच्छेदकतदनवच्छेदकत्वेनाचिंत्यत इत्यर्थः। वेदे वक्त्रभावाद्वचनेच्छानिच्छारूपतयाप्रमा
णीभूतवेदप्रमितस्य त्यागायोगाच्चिकीर्षाचिकीर्षारूपतया वा विवक्षाविवक्षयोरसंभवात्प्रतीत्यप्रतीतिरूपत
यानदमुपरामे श्रुतस्यैकत्वादेः प्रतीतत्वात् प्रतीतत्वेन त्यागायोगादसंभवं निरसितुं विवक्षाविवक्षासंभवहेतु
मन्वयव्यतिरेकाभ्यां सूचयितुं च विध्यन्वयासंभवादित्युक्तं। ततश्चानुष्ठानाननुष्ठानरूपफलहेतुकविधित्सिता
विधित्सितापरपर्यायौ विधिसंस्पर्शासंस्पर्शौ चेवेह विवक्षिताविवक्षितपदाभ्यां विवक्षितौ कृत्वा विचार इत्यर्थः
। तत्र ग्रहप्रातिपदिकस्य ग्रहत्वमर्थो वचनस्यैकत्वं द्वितीयाः कर्मत्वं च। तत्र कर्मत्वे जातेः साक्षादन्वयायोगा
16 त्पूर्वोक्तरीत्या व्यक्तिलक्षणाया आवश्यकत्वेन तस्याः कर्मत्वेनोद्देश्यत्वेपि स्वत्वसमाख्यासहकृतपदश्रुत्यै
कत्वस्य ग्रहव्यक्तावन्वयादेकत्वविशिष्टस्य यशोः करणत्ववदेकत्वविशिष्टस्यैव ग्रहादेः कर्मत्वेऽन्वयाद्य
थाग्रहत्वानवच्छिन्नेन संमार्गस्तथैकत्वानवच्छिन्नेपि न सः। यद्यपि समानाभिधानश्रुत्येकत्वस्य कर्म
त्वान्वयसंभवस्तथापि तत्रायोग्यत्वादनन्वये प्रातिपदिकार्थेनैव युक्तोन्वयः। न चाकारकविशेषणस्य

विध्यन्वयासंभवः। लोहितोष्णीषादिवदस्यापि तत्त्वस्योपपत्तेः। एवं यत्रापि यस्योभयमित्यादौ संख्यावाचकपदांत
रश्रवणं तत्रापि क्रियान्वयात्पूर्वं सामानाधिकरण्यापादुपपदार्थेन वाच्यया हि विशिष्टस्योद्देश्यत्वोपपत्तिरित्यभिप्रे
त्य पूर्वपक्षमाह। पश्वेकत्वावदिति। विध्यन्वयाभावान्नैकत्वं विवक्षितं। विध्यन्वयो हि किमुद्देश्यत्वेनाथवा गुण
त्वेन। तत्राद्ये विशिष्टोद्देशेनोत स्वतंत्रोद्देशेन वा। तत्र वदाद्यः। क्रियान्वयात्पूर्वं वैशिष्ट्यस्यात्वाभावाद्विशि
ष्टोद्देशो संभवे पि यत्र सर्वे स्मे वेत्यत्र प्रातिपदिकादेव साहित्यप्रतीतिस्तत्र साहित्यावच्छिन्नस्यैकपदोपादानावग
तपरस्परवैशिष्ट्यसंभवादविवक्षानार्येति रत एव द्विवचनादिप्रतीत साहित्यस्य प्रत्ययार्थेन्वयादिप्रतीतसा
हित्यस्य प्रत्ययार्थेन्वयादविवक्षायामपि न दोष इत्यत आह। एवमिति। प्रातिपदिकेन स्ववाच्य। बोधजननोत्तरं ल
सा क्षणया हित्यप्रतीतेर्युगपद्बोधानुपपत्तेः पश्चात्प्रतीयमानस्यासमस्तप्रातिपदिकार्थत्वात्त्वधानान्वयस्याभ्यर्हि
तत्वाच्च शक्यार्थवत्कारकोवाच्यया व्युत्पत्तेः प्रातिपदिकार्थवैशिष्ट्यायोगेन विशिष्टोद्देशो संभवइत्ति कोस्तु
मे रूप इत्यर्थः। द्वितीयमाशंकते। अर्थेति। संमार्गस्येति। ग्रहत्वलक्षितव्यक्तेरिवैकत्वलक्षितव्यक्तेरपि
कर्मत्वेन भावनान्वये संमार्गस्यापि यावर्षिकविनियोगविधिद्वयकल्पनेनोद्देश्यद्वयसंबंधो नानुपपन्न इत्यर्थः

।न काचित्क्षतिरिति। विधेयानेकत्वे हि विधिफलस्याज्ञातज्ञापनस्यैकविषयत्वस्वभावभंगापत्तेरेको विधिवा
क्यभेदः। उद्देश्यानेकत्वे तु कृत्तभावनायां तेषामन्वयाद्धि धिप्रत्येकविशिष्टभावनाविधायित्वेनानेकविधा
यित्वाभावादार्थिकैश्च विधिभिरेकक्रियोद्देशेनानेकविशेषणविधिवदनेकोद्देशेनैकं संमार्गे विषयानेक
17 विधिकल्पनसंभवाद्वाक्यभेदाप्रसक्तेर्नकाचित्क्षतिरित्यर्थः। संस्कार्यत्वोपपत्तेरिति तत्रश्च नोद्देश्यतावच्छेद
कावच्छिन्नात्वरूपेण विनियोगस्य संस्कार्यताप्रयोजकत्वमपि तु तत्समानाधिकरणधर्मावच्छेदादिनापीत्य
र्थः। वशीकरणभावादिति। क्रियायां हि गुणत्वेनान्वये तदीयाकांक्षया संबंधाद्यथापेक्षमन्योन्यनियमः सिध्यति
।प्रकृते तु क्रियाया एवोद्देश्यं प्रतिगुणत्वादुद्देश्ययोश्च स्वतः प्रधानत्वेन परस्पराकांक्षाभावात्क्रियायाश्च त
दनुरोधवृत्तित्वात्कथं परस्परं योग्रहत्वावच्छिन्नः स एवैकत्वावच्छिन्नः। गुणानुरोधेनेति भिन्नविधिविधेय
चतुर्थीकरणारूपगुणावृत्त्यनुरोधेनेत्यर्थः। समाधत्ते। भावनायाइति। घटपटं च करोतीत्यादौ चकारं विनाघ
टपटयोरुभयोः कर्मत्वेन करोत्यर्थेऽन्वयादर्शनात्करोतेरेककर्मत्वनियमेन तत्पर्याय भावनायाश्च
पित्तन्नियमात्कर्मद्वये सति भावनाप्रतिपादकप्रतिपादकप्रत्ययावृत्तेर्वाक्यभेद इत्यर्थः। ननु किमिदमे

ककर्तृत्वं। न तावदेककर्मकत्वमेककर्मत्वाश्रयत्वं वा। सर्वेभ्यो दर्शपूर्णमासौ घयानानयेत्यादौ तदनापत्तेः। तत्र पु
त्रादिवृत्तिकर्मत्वानां कर्मत्वाश्रयपुत्रादीनां च भेदात्। नाप्येककर्मत्तावच्छेदकत्वं। सर्वेभ्य इत्यत्रैव पशुत्वपु
त्रत्वादीनां भेदेनैककर्मत्वानापत्तेरित्यत आह। एककर्मकत्वं चेति। एकबोधविषयेति धर्मविशेषणं। एके
नैवेति। एकेनैव सर्वपदेन तेनैतेन रूपेण। तत्र शक्तिभिः सर्वेषां फलानां युगपद्बोधादित्यर्थः। पर्याप्तिपदकृत्यं।
त्विति। अध्वर्युयजमानौ वाचं यच्छत इत्यत्राध्वर्युयजमानत्वयोः कर्मत्वाधिकरणतावच्छेदकयोरेकविषयत्वा बोध
भावाद्द्विकर्मत्वप्राप्तावपि द्वंद्वोत्तरविभक्त्यादेवतात्वादेरिव कर्मत्वादेरपि व्यासज्यवृत्तित्वावसायात्तत्पर्या
प्त्यधिकरणतावच्छेदकयोरेकबोधविषयत्वाभावाद्द्विकर्मत्वप्राप्तावपि द्वंद्वोत्तरविभक्त्यादेवतात्वादेरिवक
र्मत्वादेरपि व्यासज्यवृत्तित्वावसाहित्यविवक्षापक्षापक्षे दैवादन्यतरस्य पदार्थैवाधेऽन्यतरस्यवाप्यमानाप
त्तिः। साहित्यविशिष्टयोरुद्देश्यत्वेप्यपूर्वसाधनत्वलक्षणायां प्रत्येकवृत्त्यपूर्वसाधनत्वस्यैव लक्षणीयत्वे
न तदनापत्तेः। न हि तयोरेककार्यजनकत्वमस्ति। अतः प्रत्येकवृत्तितयावगतेनैव रूपेण लक्षणान्न दोषः
इति कौस्तुभे द्रष्टव्यमित्यर्थः। यावज्जीवाधिकरणेति। निमित्तयोर्भेदेनानुष्ठापकतया भेदेन भाव्याक्षेपक

त्वात्तदाक्षिप्तभाव्यरूपानेककर्मत्वप्रसंगस्यतुल्यत्वमित्यर्थः। यावज्जीवाधिकरणेति निमित्तयोर्भेदेनानुसं
पकत्वान्नदाक्षिप्तभाव्यरूपानेककर्मत्वप्रसंगस्यतुल्यत्वमित्यर्थः। नच निमित्त× पकत्तया भेदेन भाव्याक्षे× १
18 हृयस्याले सहितयोरेव निमित्तत्वांगीकारेण न फलद्वयाक्षेपकत्वमित्यत आह। यथाचेति। साहित्यस्यापि पक्ष
कोटिप्रविष्टत्वेन पूर्ववदेव निमित्तविशेषणत्वानुपपत्तावर्थात्त्वात्तंत्रेण निमित्तत्वापत्तौ भेदेनैव कर्माक्षे
पकत्वात्तत्समक्षेयस्योभयमित्यादानुभयान्नेह विशेषेश्च पृथक् निमित्तत्वाश्रयणोऽस्यादेव वाक्यभेद इति
कोऽस्तु भेदस्येष्टमित्यर्थः। अत एवं नयत्र फलद्वयाक्षेपकत्वप्रसंगास्तत्र भाव्यस्यैकत्वान्निमित्तस्य च निमित्ति।
त्वेनैवाच्यात्र वाक्यभेदः यत्राप्यमावास्यायामपराह्ण इत्यादौ कालद्वयस्योद्देश्यत्वेपि कर्मनानात्वानाक्षेप
कत्वान्नवाक्यभेद इत्याह। अत एवेति। यथाच फलादौ त्वयं ग्रंथो व्याख्यातचरः। तृतीयं पक्षमाशंकते। नवि
ति। स्वर्गस्यैवेति। मंत्रेण हि प्रकरणोपात्तदर्शपूर्णमासापूर्वं प्रत्युपकारकत्वं केनचिद्द्वारेणेति निश्चिते यदे
व दर्शपूर्णमासापूर्वे उपयुज्यते तदेव द्वारं भवति न देवद्वारं भवति॥ नहि फलं तदपूर्वतज्जनककर्म
णो वोपयुक्तं अतस्तदभावेपि यथा दर्शपूर्णमाससंबंधितामात्रेण स्वर्गस्य द्वारत्वं भवतीति तद्देकत्वस्य

संमार्गभावनायां करणत्वेनान्वयेऽनेगभूतस्यापिग्रहस्य संमार्गसंबंधिता मार्गसंबंधिता मार्गसंबंधित्वमात्रेणा
दूरेतोपपत्तेस्तत्संबंधिग्रहपरिच्छेदकत्वत्वीकारादेकत्वेन ग्रहं संमृज्यादित्यन्वयोपपत्तिरित्यर्थः। तथात्वे इति
। द्वितीययातत्त्रेणाभिधानेपि कर्मत्वपर्यायस्याधिकरणतावच्छेदकस्य धर्मस्यैकत्वग्रहत्वादेरेकबोधविषयत्वा
भावेनैककर्मत्वभंगापत्त्या वाक्यभेदापत्तेरित्यर्थः। अनुवाद इति। जात्यभिप्रायेण प्रत्येकैकत्वमादाय वा
प्राप्तत्वेन शक्यार्थानुवादपक्षे एकत्वादेस्तु करणत्वेऽन्वितस्य तद्ग्रहणक्रियासंबंधेन विध्यन्वये वाक्यभेदादि
दोषातापत्तेर्युक्ताविवक्षेति। वैषम्यमित्यर्थः। ननु अष्टवर्षे ब्राह्मणमुपनयीत इत्यत्र संस्कार्ये विशेषणस्या
ष्टवर्षत्वादेरविवक्षापत्तौ अनियतवर्षस्याप्युपनयनापत्तिरिति शंकानिरासायाह। यथोचैवमिति। य
द्यप्यष्टवर्षत्वमुद्देश्यविशेषणं तथापि तस्योपयोगापेक्षायां सोधीयेतेत्येवं विपरिणतेन तमध्यापयीतेति
विधिना विनियोगकल्पनेन तच्छब्देन परामृष्टस्य वि-शिष्टस्योपादेयत्वेन तद्विवक्षोपपत्तेः। यद्यपि प्रथम
तः संस्कारान्वये तदविवक्षायां पश्चात्तन विनियोगविधावयितच्छब्देनाविवक्षितविशेषणस्यैव पराम
र्शोपपत्तिस्तथापि प्राथमिकसंस्कारान्वयेप्यष्टवर्षत्वस्य ग्रहैकत्ववन्नित्यमास्य भावेनानुवादायोगाद्धर्मं

तर्वेदीति बहुलक्षणया विशिष्टोद्देशासंभवेन विवक्षोपपत्तेः। यत्र हिरण्यमित्यादौ द्वयोरपि प्राप्तिसंभवः। एकव
चनस्यैव बहुत्वादिलक्षणायां याशन्यायादिरूपं नियामकमस्ति तत्र नोभयत्र लक्षणया विशिष्टोद्देशः। अहूतेतु
द्वयोरप्यप्राप्तत्वात्तदंगीकारेण काचित्क्षतिरिति कौस्तुभे उपपादितमित्यर्थः (एवमग्नेस्तृणान्यपपादितमि
त्यर्थः) एवमग्नेस्तृणान्यपचिनोतीत्यत्र यद्यप्यग्नेषष्ठ्यात् तृणद्वारा ऽपच्चये गुणाभावः प्रतीयते तत्रापि संबं
धसामान्यस्य विशेषतो जिज्ञासायां विशेषांतरायोगानंगांगित्वलक्षणान्वयविशिषेष्टि निष्ठत्वावसायात्कौ
गकौंगीत्यपेक्षायां चाग्नेः प्रयोजनवत्वेनांगित्वावसायादुपयोक्ष्यमाणसंस्कारस्य गरीयस्त्वात्तस्यापि तृण
संस्पर्शनिमित्तीत्यमानोत्स्नुकवह्निः पातपरिहारार्थेतयादृष्टार्थतालाभात्स्वस्वामिविषयायाश्च षष्ठ्याः स्वा
मिनिप्रयोगदर्शनेन प्राधान्यार्थत्वावसायादग्नेः प्राधान्यावगतेरुद्देश्यत्वात्तद्विशेषणौकत्वाविवक्षोप
पत्तिः। ततश्चाग्निसंस्कारत्वाद्यस्याग्नेरग्नेहोमेउपयोगस्तस्यैवायं तृणविभागरूपापचयसंस्कारविधि
रिति न सभ्यावसथ्ययोस्तृणापचयः परिस्तरणां तु आग्नीन्वपरिस्तृणातीत्यविशेषश्रवणात्तयोर्भवत्येव।
अस्तु वा तयोरपि सः। यद्यपीयं पंचमी भवेत्तथापि मध्यात्पूर्वार्धाच्चावद्यतीतिवदग्नेः प्रयोजनवत्वाद्दक्ष

णयाप्राधान्यपरे त्रिनदोषइति वार्त्तिककारः। अस्मिंश्च पक्षे ऽपचयस्यदृष्टार्थेतालाभापयचितेतत्त्वणोरेवपुनःपुनःप
रिस्तरणमुक्तमापस्तंबसूत्रे। पूज्यपादैस्तु द्वितीयपात्तरणानांप्राधान्यावगतेर्विनियोगभंगेप्रमाणाभावत्तरणाप्रतिप
त्तित्वमेव। अन्यथा तरणगतबहुत्वविवक्षापत्तेः कपिंजलाधिकरणन्यायेन त्रयाणामेव तरणानामपच्चपायत्तेर
।वशिष्टतरणासंसर्गनिमित्तोत्पत्त्यमानोल्पुकवहिः पात्रस्यापरिहार्यत्वयोग्येस्तरणापचयसंस्कार्यत्वानुपपत्तेः।
अतोबहुत्वाविवक्षायास्तरणसंस्कार्यत्वं विनाऽनुरूपपादत्वान्परिस्तरणोपयुक्ततरणप्रतिपत्तिकर्मत्वमेवाभ्यच्चय
स्योक्तं। नचतवाप्येऽकस्येवाग्नेस्तरणायच्चयावृत्तिः पंचम्यापादनत्वेनगुणत्वेपिप्रतिपाद्यतरणानुरोधेनप्रत्येकैक
त्वानुवादावगतेर्विवक्षाप्रसंगात्। अतःप्रतिपत्तित्वमेवेत्युक्तं कौस्तुभेपत्वस्मिन्पक्षेपूर्वप्रयोगार्थाग्निपरिस्तर
णोपयुक्तानामपि तरणानांप्रयोगांतरकालीनापच्चयेनाप्रतियादनात्प्रतिपत्तित्वायोगइतिन्यायसुधाकृतोक्तं। तदु
पस्थापतरणान्ययचितोतीत्यापस्तंबसूत्रेऽन्युयस्थापनसमानकर्तृत्वानुरोधेनयजमानकर्तृकोपस्थानोत्तर
कालीनापचयस्यततत्प्रयोगांतएवप्राप्तेस्तस्यप्रयोगांतरकालीनत्वोक्तेरयुक्तत्वादयुक्तमित्युपेक्षितंपूज्य
पादैः। अतएवप्रतिपत्त्यातरणानामग्नेऽनुपयुक्तत्वादुत्तरप्रयोगेष्वन्यैरन्यैरेवतरणैः परिस्तरणमुक्तंधूर्ते

स्वाम्यादिभिरित्यलं विस्तरेण। यथा चावानवाक्येऽग्निसाहित्यविवक्षा तथा कोऽस्तु भेदः ष्ठवे। प्रयोजनं स्पष्टत्वान्नो
क्तं॥ ॥संस्काराद्व॥ ॥स्पष्टार्थमेतत्॥ ॥आनर्थक्यात्॥ ॥अत्र पक्षे प्राचीनमते मुख्यशक्तित्वात्त्व
मतैर्गौणत्वाच्छेण मुख्यसाधारणशक्तिविनियोगोपयोगिचिंतनात्पादाध्यायसंगती स्पष्टं त्वादप्रदर्श्य वाज
पेयप्रकरणगतविषयप्रदर्शनपूर्वकं पूर्वपक्षमाह। सप्तदशेति। अनंतरसंगतिस्तु पूर्वत्र प्रातिपदिकार्थे वि
वक्षावचनार्थस्यापि विवक्षेति चिंतिते यत्र न हि। प्रातिपदिकार्थद्वयं तत्र कस्या विवक्षेति जिज्ञासोदयेऽवसर
सत्त्वादनंतर विवक्षाऽविवक्षे विचार्येते इत्येवमवसररूपा। यत्वत्र प्रकाशकारैः पूर्वत्रग्रहेषु संमार्गो न चम
से षित्युक्ते सप्तदशारत्नित्वं षोडशिपात्रे निविशते यूपे वेति चिंतायाः प्रासंगिकत्वेन न्यायसुधाकारोक्तं मुख
स्य साक्षात्संगतिसंभवे प्रसंगसंगत्यभिधानस्यायुक्तत्वात्तदृष्यसाक्षात्संगत्युपपादनं कृतं। संस्कारद्रव्यग
तेषु विधिप्रत्यंतरंगबहिरंगभावाक्रमेणयथासंयोगं व्यवस्थोक्तौ एकत्वादेरारुण्याधिकरणोक्त क्रियाच
यतदीयद्रव्यनिवेशापवीदद्वारा संस्कारैर्यथासंयोगं व्यवस्थाव्यवस्थाविशेषचिंतामधिकरणद्वयेन कृत्वा
द्रव्ये विशेषचिंतासंभवाद्गुणे सप्तदशारत्नित्वे आरुण्याधिकरणन्यायेन सामान्यतः सिद्धयोः क्रियांगत्व

तदीयद्रव्यनिवेशो योस्तद्विशेषचिंता किं वा जपेयांगं सत्तदंगे षोडशियागे निविशते उत पशुयागांगं सत्तदंगयू
येऽतीति। तदेकहायन्यादिपदवद्बहुव्रीहित्वेन सप्तदशारत्निपदस्य द्रव्यपरत्वात्स्वरूप एव क्रियांगत्वायोगेन त
त्सामान्यचिंताविषयत्वासंभवाद्विह विशेषचिंतात्वासंभवेन साक्षात्संगत्यसंभवादयुक्तमित्युपेक्षितं पूज्यपा
दैः। यथा चास्य द्रव्यपरत्वं तथा निरूपयिष्यते। अत एव प्रसंगसंगतिमिव साक्षात्संगतिमपि विहाय कौस्तुभेऽवस
रसंगतिरेव दर्शिता। तत्र यूपोद्देशेन सप्तदशारत्नित्वविधाने न तावद्बहुव्रीह्युपात्तान्यपदार्थत्वेन यूपस्योद्दे
श्यत्वसंभवः। एकप्रसरताभंगापत्तेः। नापि यूपपदार्थत्वेन तथात्वेऽन्यपदार्थान्वये न समासानुपपत्तेः। अर
त्नीनां प्राप्तत्वेन विध्यनुपपत्तेश्च। अरत्न्यनुवादेन संख्याविधानेऽतिप्रसंगानिराकरणाय यूपीयाच विशेष
णे भेदवाक्ये कप्रसरताभंगापत्तेश्च। अतः सप्तदशारत्निद्रव्यं स्वामित्वार्थकषष्ठ्याप्रतीत्यादितत्प्राधान्याद्वाजपेयो
द्देशेन विधीयते। एवं चाव्यवहितप्रधानान्वयषष्ठीश्रुतिकथंभावानुग्रहादिकं लभ्यते। अन्यथा दीक्षणीवा
ड्डि:यमन्यायेन पशुपूर्वार्थत्वस्य यूपमात्रार्थत्वस्य वा यत्स्यावाजपेयानंगत्वात्तद्बाधापत्तिः। किंच विशिष्टोद्देशवा
क्यभेदापत्तेरकतरविवक्षायां मुख्यत्वाद्वाजपेयपदार्थविवक्षामंगीकृत्य यूपाविवक्षैव युक्ताऽन्यथा प्रकरणादे

ववाजपेयसंबंधित्वप्राप्तेर्वाजपेयपदानर्थक्यापत्तेरत एवाक्षसप्तदशारत्नित्वविशिष्टयूपस्यैवविधानंपरास्तमि
त्यभिप्रेत्यपूर्वपक्षमुपपादयति। अव्यवहितत्वेति। द्रव्यविधानेपि लोहितोष्णीषादिवच्छिद्धिशक्तेर्विशेषणांसं
क्रांत्यभिप्रायेणाह सप्तदशारत्नित्वमित्युक्तं। वाजपेयेवाधात्कथं तस्यागत्वमित्याशंकां निरस्यति। तदीयेति। रसा
धारभूतस्यापि षोडशिपात्रस्य ग्रहैर्जुहोतीत्यनेन यागांतर्गतप्रक्षेपांगत्वेन वाजपेयं प्रतिसाक्षादंगत्वान्नद्वा
रानिवेशेत्यर्थः। अन्यगतहयापात्राणां साधारणत्वादसाधारणेन वाजपेयसंबंधित्वेन तत्रैव निवेशं सत्त्वपि
तुं तदीयेत्युक्तं। ऊर्ध्वपात्रे षोडशिगृहद्रव्ये त्यर्थः। सादृश्यादिति। तस्य च पात्रस्य खादिरत्वादूर्ध्वत्वाच्च यू
पसादृश्यमास्य यूपपदं गौणमत एव ऊर्ध्वेयात्रपाचकपदसामानाधिकरण्याभावेपि सप्तदशारत्नियूप
सदृशमित्येवं गौणसामानाधिकरण्यमादायोर्ध्वपात्रविषयत्वसिद्धिरित्यर्थः। यत्तु सोमनाथेन यूपेख्वा
दिरत्वस्यैवैकल्पिकत्वात्तस्यनियतोपस्थित्यभावाद्यूपपदेन नियतोपस्थितोर्ध्वत्वसादृश्यमात्रस्यैव ग्रह २१
णोन सर्वोर्ध्वपात्रमात्रे निवेश इत्युक्तं तत्पक्षेउपस्थितस्यापितस्योतरनियमनार्थत्वोपपत्तेरयुक्तेः। अत ए
वैंद्राग्न एकादशद्वादशकपालत्वयोर्विकल्पेपि द्वादशकपालत्वयोर्विकल्पेपि द्वादशकपालापांहृतो वि

कल्पितत्वाददशाकपालेंद्राग्नविकारत्वमिष्यते।एवंतुयेऽस्मिन्नेपूज्यपादैः।यद्यपिद्वयोर्मध्येजघन्यस्यापिविवक्षायुक्तानतथा
पिजघन्यस्यापिपूपपदस्यस्वार्थत्यागापिक्षयामुख्यस्यानुवादत्वमेवयुक्तमितितदनुरोधेनाव्यवहितप्रधानाच्च
यषष्ठीश्रुतिविनियोगपरित्यागमप्यंगीकृत्यपूपोद्देशेनैवतद्विधानं।तत्रसमासार्थान्यपदार्थद्वद्रव्यस्यपूपेवि
धानोसंभवाद्यूपपदेपूपकार्यलक्षणयापूपकार्येसप्तदशारत्निद्रव्यविधानेयद्यपिनत्कार्येऽन्यदेवद्रव्यमा
पतेत्तथापिप्रकृतिप्राप्तपूपत्वाविरोधेनापिसप्तदशारत्निद्रव्यनिवेशोपपत्तेर्यूपाख्यद्रव्यविधानसिद्धिरित्यभि
१ प्रेत्यसिद्धांतमाह।पूपयदस्येतिरपदसामानाधिकरण्यंविनागोणत्वायोगायूपपदस्यगोणताश्रूपरोणोर्ध्वपा
त्रविषयत्वेऽन्योन्याश्रयापत्तेर्नोर्ध्वपात्रविषयत्तासिद्धिरित्यर्थः।यस्तुप्रकरणानुग्रहःसममाप्यविशिष्टइत्याह।
पूपकार्येत्ति।पूपस्यतत्साध्यनियोजनस्यतत्साध्यपश्वपूर्वस्यवासप्तदशारत्नित्वंविनापिप्रकृतोसिद्धिदर्शना
त्तत्स्वरूपेप्यानर्थक्यापत्तेर्दार्श्यणायवाङ्गिःयमन्यायवाधेनलक्षितलक्षणयाऽधिकारख्यप्रकरणासहकृतेन
पूपदेनवाजपेयापूर्वसंबंधित्वस्यैवलक्षणाद्वाजपेयापूर्वप्रयुक्तत्वसिद्धेर्वाजपेयस्येत्यनुवादइत्यर्थः।एते
नवाजपेयसंबंधित्वत्लाभायवाजपेयपदस्यपूपविशेषणत्वांगीकरणंभवदेवादीनांयत्त्वविशिष्टोद्देशे

वाक्यभेदापादनेनतद्रूपतांप्रकाशकारतांतदुभयमप्ययास्तं।तद्विशेषणत्वेप्यर्थात्सप्तमीस्थलेपरस्परान्वयस्याचा
मतेस्तुत्पन्नत्वेनवाक्यभेदानापत्तेश्च।एतेनपूर्वांगसप्तदशारत्नितायावाजपेयेपकथंभावाकांक्षालक्षणाप्र
करणेनाग्रहणात्रवाजपेयापूर्वप्रयुक्तत्वमपितुवाङ्गित्वमन्यायेनपश्चपूर्वप्रयुक्तत्वमेवेतिसोमनाथोक्त
मपास्तं।कथंभावाकांक्षालक्षणप्रकरणाग्रात्यत्वेप्यानर्थक्यापत्तिसहकृतयूपपदश्रुत्येवतदंगत्वबोधनेन
वाजपेयापूर्वप्रयुक्तत्वस्यैवापत्तेः।ननुवाजपेयांगत्वेनयूपाप्रसिद्धेःकथंवाजपेयसंबंधित्वप्राप्त्यानुवादइत्य
तआह।षष्ठीचेति।अत्रचप्रावारीत्वायूपमात्रस्योद्देश्यत्वेसमासार्थविधानस्यतस्मिन्नसंभवात्कार्यलक्षणायांच
लक्षणापत्तेर्नियमोनयूपत्वाविरोधेनेवद्रव्यविधानस्यातिक्लिष्टत्वापत्तेः।द्रव्यविशेषानुपादानोपपत्ते
श्चनतदुद्देशेनद्रव्यविधिरपितुयूपपदस्यतात्पर्यग्राहकत्वमंगीकृत्यसप्तदशारत्नीपदेनविशिष्टयू
पविधिर्वाजपेयोद्देशेन।तस्यचाप्राकृतकार्यकरत्वापत्तेर्वाजपेयेसाधनत्वादिनानिवेशायोगात्षष्ठ्याश्चपरं
परासंबंधेप्युपपत्तेस्तदीयपश्वंगनियोजनद्वारेणनिवेशान्नकश्चनदोषइतियुक्तंवक्तुमितिममभाति।प्र
योजनंस्पष्टत्वान्नोक्तं।कर्तृगुणे॥आनर्थक्यापत्त्याकृतक्रियान्वयायोगेनतदंगावतारिस्थितेतद्विशेषचिंता

लेऽनौतराधिकरणाद्व्यस्यानंतरसंगतौस्पष्टायांयद्यप्यभिक्रमणोपव्यानयोस्तदंगावतारेसन्निसंस्कारत्वापत्तेःसंभा
गोरव्यसंस्कारचिंतानंतरमेवेयंचिंताकर्तुंयुक्तातथापिक्रियायाःसाक्षात्क्रियान्वयायोगाद्गुणवत्क्रियासाधनद्र
व्यद्वारकक्रियान्वयेनार्थाद्द्रव्यसंस्कारत्वावगतेर्गुणचिंतानंतरमप्यसौयुक्तेतिसंगतिमभिप्रेत्यविषयप्रदर्शनपू
र्वकंपूर्वपक्षमाहादर्शेति।अन्वयानुपपत्तेरिति।कारकत्वाभावादन्वयानुपपत्तेरित्यर्थः।द्रव्यपरिच्छेदद्वाराक्रिया
याश्रयिकारकत्वेनान्वयोपपत्तिंनिरस्यति।आरुण्यवच्चेति।अव्ययकृतोभावेभवंतीत्यनुशासनेनाव्ययत्वा
णमुलोभावमात्रवाचित्वावगमेनसमानाधिकरणकर्तृकरूपद्रव्यानुपादानाद्द्रव्यविषयनियमेचोपपत्तिभू
तस्यसाध्यक्रियासंबंधस्यणमुलुक्तसमानकर्तृत्वपूर्वकालत्वान्यथानुपपत्तिसाध्यत्वेनकर्तृभूतद्रव्यान्वया
त्यागनवगतेःद्रव्यनियमोपपत्तित्वायोगादपरिच्छेदकत्वेनचक्रियायागुणवत्क्रियासाधनद्रव्योपादानानोप
यिकत्वादध्वर्योरव्यस्यचद्रव्यस्यद्वारत्वेनाभिमतस्यानिकक्रियासाधारण्येनैकहायनीवदवस्थितक्रियाद्वा
रत्वायोगाच्चनवाक्यीयक्रियान्वयआरुण्यवदित्यर्थः।एतेनारुणाधिकरणेनगतार्थत्वमपिनिरस्तं।ननुप्रा
करणिकसर्वहोमांगत्वेप्यारादुपकारकतयैवांगत्वापत्तिरित्यतआहतदीयेति।आमीक्षामेणमुत्तूचेतिस्म

तेर्वीप्सार्थस्यावृत्तिरूपस्याभीक्ष्ण्यस्य णमुलोपादानादाराद्दुपकारकत्वे च तंत्रत्वादाहत्यनुपपत्तेः संस्कारस्य
२३ तु कार्ययोग्यताधानार्थत्वात्स्वातिकार्यमात्रत्वनुपपत्तेः कर्तृसंस्कारकत्वमेव सोपिचदृष्टरूपतयेत्यर्थः। अनुपा
त्तस्यापीति। णमुलो भावार्थकत्वात्समानकर्तृकयोरित्यनुशासनस्य संसर्गानुशासनमात्रपरत्वेन णमुल
स्तदप्रतीतिमभिप्रेत्याख्यातगम्यस्येत्युक्तं। अत एव पूर्वकालतादिसंबंधेनेत्यत्रादिपदेन समानकर्तृत्वसं
23 बंधसंग्रहः। वाक्कीयजुहोत्यन्वयविछेदेन भाष्ये कृतस्य पूर्वपक्षस्यानितुछत्वेनायुक्ततां दर्शयन्वार्तिक
कारोक्तरीत्या विचारं दर्शयति। पूर्वपक्षमाह। सत्यपीति। यद्यपि णमुलः कारकत्वानभिधायकत्वेन मु
ख्यश्रुतित्वासंभवाद्धातुसंबंधस्याप्यंगत्वरूपस्य संसर्गविधया भाविनषष्ठीवद्द्वारा श्रुतित्वस्याप्यनुपप
त्ते द्धोरीभूतकर्त्रंगत्वस्य लिंगगम्यत्वान्न श्रुतिविनियोगोपयोगिविचारत्वमपादार्थतयाऽयं विचारः संगतस्त
थापि णमुलभावे वाक्येनाप्यंगत्वायोगात्सामुल श्रुत्युन्नीतत्वेन श्रौतत्वोपचारात्संगतिः। सत्यपीत्यपिशब्देन सूचि २३
ता। अनंतरा तु साक्षात्प्रधानांगत्वे होमांगत्वश्रवणेन बाधितेत्तद्विशेषचिंतादवसररूपास्यैवा। नत्र हो ता
मांगत्वेन प्रमितमपि तत्स्वरूपे आनर्थक्यप्रसक्तो प्रधानाधिकारात्स्वप्रकरणेन कर्तृसंस्कारद्वारा प्रधानापू

वेसंबंधिहोमत्वस्योद्देश्यतावच्छेदकत्वावगतेः। कंतु श्वांगप्रधानसाधारणस्यहर्त्वेनप्रधानसंबंधित्वस्यापि
साक्षात्परंपरासाधारणपेनैवविवक्षितत्वात्प्रकृतेसर्वेहोमांगत्वमथवावाक्यसंकोचप्रमाणाभावादंगा
धिकारस्यापिप्रधानाधिकारवदपूर्वसाधानत्वलक्षणातात्पर्यग्राहकत्वात्प्रकृतसर्वेहोमार्थत्वमित्य
भिप्रेत्यपूर्वपक्षमाह। संकोचइति। यदिहीति। (यदिहीति) यद्यभिक्रमतीत्येवंश्रूयेततदावाक्यव्यापाराभा
वात्तेनप्रयाजमात्रांगत्वमेवस्यादित्यर्थः। यदिप्रधानेतिकर्तव्यताकांक्षायाप्रयाजानामंगत्वेतद्ग्रहणो
तेनक्रतूपकारभाव्यकत्वावगतेस्तेषामितिकर्तव्यताकांक्षाकल्प्येततदाप्रथमप्रवृत्तयाप्रधानाकां
क्षयाप्रयाजानामभिवाभिक्रमणस्यापिप्रधानमात्रांगत्वापत्तिः। एवंसत्यपितदाकांक्षयागृह्येततदाबाध
कमाह। अनथेति। नचभावनास्वाभाव्येनोत्पद्यमानानांप्रयाजादीनामंगाकांक्षानुपजीव्य। नप्रथमप्रवृत्तेनप्र
धानकथंभावेनप्रतिबद्धेतिनतयापरस्परांगत्वं। आवश्यककल्प्यत्वादित्रयविनियुक्तेनागेनचप्रतिबंधक
निरोधेसन्नुज्जीविततयानतयाऽभिक्रमणस्यापितत्संदंशपतितस्यग्रहणोपपत्तिरित्यतआह। वाचनिकेति।
वाचनिकांगसंबंधसिद्ध्यर्थकल्प्यस्यप्रतिबंधकनिरोधस्यधर्मिग्राहकप्रमाणेनप्रत्येकमेवकल्प्यत्वात्तु

मुचितत्वादभिक्रमणस्यतन्निरोधकल्पनेप्रमाणाभावेनानुज्जीवितयाप्रयाजाकांक्षयाग्रहणानुपपत्तिरित्य
र्थः। अतिदेशेनेतिदीक्षणीयावैमृधादिष्वित्यर्थः। स्वसंपादनेनेति। यागस्वरूपासंपादकद्रव्यदेवतादि
नेत्यर्थः। नह्यदिर्हीति। लोकेउत्तेजकेनोत्तेजनाकरणेपिवह्निमात्रेणदाहदर्शनात्प्रथमतृतीयक्षणेउत्ते
जकसत्वेद्वितीयक्षणेमणिमात्रेणप्रतिबंधदर्शनाच्चव्यभिचारेणनोत्तेजनंकार्यमपित्तूत्तेजकविर
हविशिष्टमणेःप्रतिबंधकत्वंतदभावश्चाग्नेःसहकारीतिकल्प्यतेप्रकृतेत्वाग्नेयागाकांक्षायाअभावे
प्रधानगतफलवत्वप्रतिबद्धप्रयाजाकांक्षयावाचनिकाग्नेयागग्रहणादर्शनाद्व्यभिचाराभावात्प्रति
बद्धाकांक्षोत्तेजनमेवोज्जीवनापरपर्यायंकार्यंकल्प्यते। नतुतस्यानस्योत्तेजकतांप्रकल्प्यतत्तदुत्तेज
ककूटाभावकूटस्यप्रतिबंधकतावच्छेदकेप्रवेशगौरवापत्तेः। अपित्वाग्नेयोत्तेजकस्योत्तेजनजनक
स्यत्वेमंतिमेनचेतदुत्तेजननाशस्तद्विरहविशिष्टस्यैवमहाप्रकरणस्यप्रतिबंधकत्वंतदभाव २४
स्यसहकारिकारणत्वमितिकल्पनान्मध्यमनंगानांकांक्षाणांप्रत्येकमुत्तेजकत्वकल्पनेप्रमाणाभा
वादुत्तेजिताकांक्षालक्षणावांतरप्रकरणपतितस्याभिक्रमणस्यापितदंगत्वं। अतएवोत्तेजितां

गाधिकारस्यैवापूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वदर्शनात्त्वद्वपरोत्पत्त्यापूर्वेप्रवृत्तेर्घानाधिकारबाधे प्र
नतस्यतद्वक्षणतात्पर्यग्राहकत्वासंभवाद्वीकृणीयावाङ्गिःपमन्यायेनप्रयाजार्थत्वसिद्धिरित्यर्थः।अ
स्ति चात्रेति।इडाख्यततीयप्रयाजानंतरं बर्हिराख्यचतुर्थप्रयाजंप्रतिउपभृतःसकाशाज्जुह्वामौपभृताज
स्यार्धसमानयतइत्यर्थः।यद्यप्यत्रप्रयाजशब्देनास्तितथाप्यौपभृतीज्यस्यप्रयाजानूयाजार्थत्वात्तत्रच
प्रयाजार्थस्यैवसमानेयत्वात्प्रयाजांगकीर्तनसिद्धिरित्यविरोधः।ननुप्रयाजेषुप्रत्यक्षोतोजुहोतेरश्र
वणाच्चतुर्गृहीतंजुहोतीत्यनारभ्यवाक्येनहोमेचतुर्गृहीतस्यसाधनत्वेनविधानाद्धोमत्वाभावात्कथंत
दनुवादेनविधीयमानाभिक्रमणस्यतदंगत्वं।अतएवचतुरवत्तंजुहोतीत्यनेनप्रधानेषुचतुरव
त्तसंस्कारकतयाहोमविधानात्तदंगत्वमेवयुक्तमित्यर्थशंकांपरिहरति।नचेति।प्रक्षेपांगकेति।विस्त
रेणचैतत्तृतीयेउपपादयिष्यते।प्रयोजनंप्रतिहोमंकर्तृसंस्कारकत्वादभिक्रमणानुष्ठानमप्रयाजवि
कृतिष्वप्यतिदेशश्चपूर्वपक्षेसिद्धांतेतुप्रयाजार्थमेवतदनतिदेशश्चेतिस्पष्टत्वात्रोक्तं॥संदिग्धेतु॥
अत्रसामिधेन्यंगत्वपूर्वपक्षदर्शपूर्णमासांगत्वसिद्धांतोपपत्तिमूलावांतरप्रकरणसद्भावतद्धि

दोपपादकतयाविचारानुपपुक्तमपि विषयवाक्ये नस्स होदाहरन्ति । दर्शपूर्णमासयोरिति । सिद्धान्तकोटिहेतुतया
२५ दर्शपूर्णमासयोरित्युक्तं । वाचनिकागुणाद् इति त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यादपइत्यर्थः । अंतरानू
च्यमिति यत्क्रौंचमन्वाह तदासुरं यन्मंद्रं तन्मानुषं यदंतरा तत्सदेवमिति पूर्वं वेतिं द्वितक्रौंचमंद्रयोर्यदंत
रामध्यवत्तोमध्यमः स्वरस्तेनानूच्यमित्यर्थः । ततश्च विश्वरूपो वै त्वाष्ट्र इति प्रयाजकेस्ससमाष्टमानुवा
25 कयोः सामिधेनीब्राह्मणमाम्नातं । नवमे देवेद्धो मन्विद्धो ऋषिष्टुतो विप्रानुमदितः कविशस्तो ब्रह्मसंशित
इत्यादि निवन्मंत्राणां । दशमे काम्यानां सामिधेनिकल्पानां । एकादशे उपवीतस्य तदंतरालगुणविधि
नां च ब्राह्मणमाम्नातमित्यवांतरप्रकरणान्तद्विच्छेदसंशयाद्विचार इत्यर्थः । सोत्र संदिग्धपदव्याख्यार्थे
सवश्यमुपन्यसनीयमप्यवांतरप्रकरणसद्भाववत्तद्विच्छेदसंशयं तथाकर्तुं संस्कारसामान्याद्बुद्धिस्थस्यो
पवीतस्य भाष्यकारमते संनिहिता च यापवादद्वार्तिकमते ऽवांतरप्रकरणापवादादपवादिकीमनंत २५
रसंगतिं च स्पष्टत्वादनुल्लिख्यात एव श्रौतविनियोगोपयोगिविचाराभावेन पादसंगत्यभावेप्यसक्तिं
चाभिसंधाय पूर्वपक्षमाह । तत्रोपवीतमिति । अत्रोपवीतं नाम ब्रह्मसूत्रं नवतंतुकं यज्ञोपवीतापरप

योयंग्राह्यमथवावासोविन्यासोवेतिसंदेहेनिर्णयस्तृतीयेकरिष्यते।तद्वांतरप्रकरणादिति।नचादृष्टार्थस्याप्रो
क्षणादिसंस्कारस्यावांतरप्रकरणासद्भावेपि सामिधेनीनामग्निसमिंधनरूपदृष्टकार्यार्थत्वाद्दृष्टरूपेति।क
र्तव्यतयैवतदाकांक्षानिवृत्त्युपपत्तेरितिकर्तव्यतयाऽनपेक्षणात्तत्पयिवाचनिकानांवचनादेवांगत्वेऽवां
तरप्रकरणस्यैवाभावेकथंतेनतदंगत्वमितिवाच्यं।अग्निसमिंधनस्याप्यपूर्वसाधनत्वोपहितत्वेनभाव्य
त्वात्सामिधेनीनांनियमादृष्टजनकत्वाच्चावैधेतिकर्तव्यताकांक्षोपपत्तेरेवांतरप्रकरणोपपत्तिरित्यर्थ
ः।निविन्मंत्रेवेति।निविन्मंत्राणांमहाप्रकरणसहकृतलिंगेनसामिधेनीवदेवाग्निसमिंधनप्रकाशकत्वे
नाग्निसमिंधनार्थसामिधेन्यंगत्वायोगादनुपजीव्यन्यायेनव्यवधानात्सामिधेनीप्रकरणाविच्छेदोपपत्तिरि
त्यर्थः।गोदोहनादीनामितिदर्शपूर्णमासांगप्रणयनाश्रयत्वेनप्रकरणानुवृत्तेःसत्वेनप्रकरणाविच्छेदकत्व
वदिहाप्यविच्छेदकत्वोपपत्तिरित्यर्थः।निविन्मंत्रैर्विच्छेदप्रकारांतरेणापिपरिहरति।वस्तुतस्त्विति।सामिधेनी
वन्निविदामप्यग्निसमिंधनप्रकाशनार्थत्वेपि सामिधेनीनामग्निसमिंधनार्थेध्मकाष्ठप्रक्षेपप्रकाशनार्थत्वान्नि
विदामिद्धइतिभूतनिर्देशेध्मप्रक्षेपफलाग्निसमिंधननिष्पत्तिप्रकाशनार्थत्वेत्वादग्नम्मइतिमंत्रस्यदर्शपूर्ण

मासफलनिष्पत्तिप्रकाशनार्थस्य दर्शपूर्णमासांगत्ववत्सामिधेनीप्रकाश्येध्मप्रक्षेपफलनिष्पत्तिप्रकाशनादनुपजीव्यत्वां
२६ गत्वाभावेन विच्छेदकत्वानुपपत्तिरित्यर्थः। दर्शपूर्णमासादिफलस्यादृष्टद्वारसाध्यत्वेन श्रद्धापेक्षत्वाच्छ्रद्धाजननात्फल
26 निष्पत्तिप्रकाशनस्यांगत्वसंभवेपीहेध्मप्रक्षेपफलस्याग्नेः समिद्धत्वस्यादृष्टद्वारसाध्यत्वेन श्रद्धानपेक्षत्वात्फलनि
ष्पत्तिप्रकाशनस्यांगत्वायोगे न निवित्प्रकाश्यफलसाधनेध्मप्रक्षेपप्रकाशनार्थत्वेन सामिधेनीनामेव नतदंगत्वस्य
निवारयितुमशक्यत्वाद्धिनिगमनाविरहेणाचनैर्विच्छेद इति वस्तुतस्त्वित्याद्युक्तप्रकारांतरदूषणस्य स्पष्टत्वादुपेक्ष्य
पूषानुमंत्रणमंत्रणवदविच्छेदकत्वमुक्तं परिहरन्सिद्धांतमाह। निविद्भिरिति। अन्यथेति। विश्वजिदादिविध्यु
त्तरं वाचनिकदर्शांगसत्वेन दर्शपूर्णमासप्रकरणानुवृत्तिकल्पनया दर्शांगत्वापत्तेरित्यर्थः। प्रकरणानुवृत्ति
कल्पनेति। अतश्चोत्तरांगाणां प्रकरणे न तदंगत्वायोगे ऽनारभ्याधीतानां प्रकृतौ निवेश इतिन्यायेन प्रकृतसामि
धेन्यंगत्वोपपत्तिरित्यर्थः। एतच्चोपवातस्य संदंशपतितत्वमभ्युपेत्योक्तं वस्तुतस्तु संदंश एव नास्तीत्याह। व २६
स्तुतस्त्विति। विशिष्योपस्थित्यभावादिति। ततश्चाविच्छेदे सति प्रकरणानुवृत्तेरनूच्यमिति सामान्यशब्दो विशे
षपरः स्याद्विशेषपरत्वे च संदंशात्प्रकरणानुवृत्तिरित्यन्योन्याश्रयापत्तेर्न विशेषपरत्वेन सामिधेन्युपस्थि

तिरित्यर्थः। आघारार्थवादत्वादिति। सामिधेन्यनुवादस्य तद्गुणविध्यर्थत्वाभावात्स्तुत्यर्थमुपादानाच्च तदाकांक्षा
नुवृत्तिकल्पनासंभव इत्यर्थः। न चेंद्रियकामाधिकरणन्यायेनैकविंशत्यादिगुणानां फलाच्च यावश्यंभावे तत्र
च वाक्येनाश्रयसमर्पणे वाक्यभेदापत्तेः प्रकरणेनैवाश्रयसमर्पणं कर्तव्यमिति कात्यकल्पेः प्रकरणस्योज्जीवना
त्सामिधेन्यंगत्वं दुर्वारं प्रकरणोज्जीवनाभावे च कथं गुणफलसंबंधसिद्धिरित्यभिप्रेत्याशंकते। न चैवमिति
। अत एवाश्रयालाभान्न गुणफलसंबंधः किं त्वनिविशमानैकविंशत्यादिगुणाद्भिन्नस्यानुवचनस्यैव विधि
रिति न तदनुरोधेन प्रकरणोज्जीवनमिति परिहरति। तत्रेति संख्यायुक्तेति। अनुवाक्यासाधारणसादृश्यव्या
वृत्तये संख्यायुक्तेत्युक्तो न च पंचदश सामिधेनीरिति प्रकृतिवाक्ये प्रकरणावगतांगभावानां सामिधेनीनाम
चां द्वितीयया सांस्कार्यत्वात्फलस्य चाश्रमेऽनिर्देशान्निराकरणात्कथमतिदेशः न च सामिधेनीनामुद्देश्य
त्वेन तद्विशेषणपंचदशत्वाविवक्षाप्रसंगः। तस्य त्रिरभ्यासविधानसहितपाठादेव प्राप्तत्वेऽप्यपत्तेरित्याश
येनाशंकते। न च चर्चोमिति। त्रिरभ्यासयुक्तेति त्रिः प्रथमामन्वाहेति त्रिरभ्यासविधानसहितेकादशर्चपाठादे
वेत्यर्थः। अर्थाच्चेति। अनुवचनं सूच्चारणं रूपं तच्चार्थप्रकाशनस्योच्चारणक्रियावच्छेदेनैवं संभवादर्थेतः

मात्समित्यर्थः॥ विधेयत्वेनेति। सामर्थ्यपरिकल्पिताग्निसमिंधनार्थतयाविधेयत्वेनेत्यर्थः। यत्वत्रप्रकारैः सामिधे
२७ नागतत्लिंगाविरोधायानुवचनफलीभूताग्निसमिधंनप्रकाशकंतयासामिधेनीनामनुवचनंप्रतिगुणा
त्वंप्रतियादितं। नत्वातिष्टादिफलार्थानुवचनेष्ट्वरस्लोपात्सामिधेनीनांप्राप्त्यभावापत्तेः कथंचिद्दृष्टप्राप्तोप्रति
ष्टादिपदोहापत्तेः काम्येननित्यस्यप्रसंगसिध्यनापत्तेश्चायुक्तमितिसूचयितुमन्यथागुणत्वमुपपादयति
27 गुणत्वमपिचेति। नचानुवचनांतराणांदर्शपूर्णमासागृहीतानांनहिःक्रतुप्रयोगापत्तिरित्यतआह। अनुशा
वेनचेति। अत्रचाग्नयेसमिध्यमानायानुब्रूहीतिप्रेषानंतर्यमेवानुब्रूयादित्युपसर्गस्यानोरर्थमंगीकृत्यप्रे
षस्यचक्रत्वर्थाग्निसमिंधनार्थत्वेनवहिःक्रतुप्रयोगेऽप्राप्तेरनुवचनत्वव्याघातापत्तेर्नोवहिःक्रत्वनु
ष्ठानमितिन्यायसुधाकारः। प्रेषानंतरंनमःप्रवक्त्रइतिनिगद्पाठात्तदनंतरंसामिधेनानांपाठात्रिगदानां
तर्यमनारथंमंगीकृत्यतस्याप्यपिपरप्रयुक्ताग्निसमिंधनार्थस्यवहिःक्रत्वप्राप्तेरनुवचनत्वबाधापत्यानव २७
हिःप्रयोगइतिपार्थसारथिः। एवंचान्यतरनिष्कर्षंविनापिसर्वेषांवहिःक्रत्वनुष्ठानफलसिद्धेस्तमकृत्वे
वमतभेदंसूचयितुंसामान्यतःपूर्वपदार्थानंतर्यस्याक्तत्वादिन्युक्तावक्तस्तु। प्रेषानंतर्यस्यप्रेषार्थे

सामर्थ्यादेव प्राप्तेरनुवचनविधिवैयर्थ्यापत्तेर्भिन्नकर्तृकयोः क्रिययोः क्रमाणापेक्षणेनापेक्षिताविधित्वापत्तेश्चा
पेक्षितविधित्वलाभाय प्रैषानंतर्येणावाधितं होत्रनिगदानांतर्येणैव प्राप्तिसववि घयाविधातु युक्तं ॥ निगदेना
च सामिधेनीवत्त्वात्तत्र्येणापि समिंधनार्थत्वेन सामिधेन्यंगत्वेन प्राप्तेरभावात्तदनुरोधेनांतः प्रयोगइति ॥ न
नु यद्यपि नमः प्रवक्त्र इत्यादिनिगदानंतर्यमनुवचनस्य तथापि तस्यैव च जनाममहोत्रं जुषध्वं तदद्य वाचः
प्रथमं मशीयेत्यादिवाक्यपर्यालोचनया करिष्यमाणसर्वकर्मार्थत्वेन सामिधेनिमात्रार्थत्वेन वा प्रवक्त्रादि
प्रार्थनापरत्वावसायात्सामिधेन्यंगत्वस्यापि संत्वेन वहिः क्रतुप्रयोज्यत्वोपपत्तेस्तदानंतर्यसंभवत्येव ॥ प्रदापि प्रै
षानंतर्येतदापि स्वफलार्थमनुज्ञाज्ञापनरूपं स्यांगस्य विकृताहोहेन प्रयोगोपपत्तेर्वहिः प्रयोगेप्याक्षेपेणोत्तदानंतर्यसं
भवाद्वहिः क्रतुप्रयोगो इष्टे योगो दुर्निवार इति चेन्न ॥ अनुशब्देनोत्तरकालवाचिनां सांगसामिधेनीभावनायां तदंग
भूतपूर्वपदार्थोत्तरकालत्वस्य विहितत्वात्पूर्वपदार्थस्य च परप्रयुक्तस्याक्षेप्तुमशक्यत्वेन तदुत्तरकालत्वासंभ
वात् ॥ अतो न वहिः क्रतुप्रयोगापत्तिरिति कौस्तुभे द्रष्टव्यं यत्तु वार्तिके पृथक्प्रयोगे सत्येकविंशतिसंख्यापरि
च्छेदत्वेनातिदेशप्राप्तानामपि प्रवो वाजेत्यादृचामग्निसमिंधनाप्रकाशकत्वेन सामिधेनीत्वाभावापत्तेरप्र

योगमध्यस्थस्य चाग्नेर्निष्फलत्वेनासमिंधनीयत्वेनऋचामग्निसमिंधनप्रकाशकत्वानुपपत्तेः सामिधेनीनामे
२९ कविंशत्यादिसंख्यापरिच्छेदत्ताऽतिदेशप्राप्ताविहन्येतेत्युक्तं। तत्सामिधेनीनामनुवचनांतरे जनकत्वमात्रार्थत्वे
वानुषंगिकाग्निसमिंधनस्य प्रयोजकत्वाकल्पनात्परप्रयुक्ताग्निसमिंधनाभावेपि प्रतिष्ठाफलकानुवचनस्य प्र
योजकस्य सत्वेन तत्त्याग्नुपपत्तेः कादाचित्काग्निसमिंधनार्थत्वेनापि सामिधेनीत्वाविघातान्नावहिः ऋतु
प्रयोगवाधकमित्युपेक्षितं पूज्यपादैः। एवं मंतः ऋत्वनुष्ठानस्य साधितस्य फलमाह। विकृतेति। अतः काम्यक
त्वेष्वावश्यकाश्रयत्वलभोयन सामिधेनीप्रकरणोज्जीवनापेक्षेत्युपसंहरति। अतस्तेष्वपीति। तत्कर्तृसंस्कार
कतयेति। अनेन च सामिधेन्यंगत्वपक्षे तदारंभे एव काऽत्रोऽवैयर्थ्यापादकतयोपवीतं पूर्वपक्षे कार्यो सिद्धांते तुद
र्शपूर्णमासप्रयोगारंभे इति प्रयोजनं दर्शितं। गुणानां॥ विषयवाक्यमुदाहरति। आधाने इति। यज्ञेऽवचयते २९
ऽनुष्ठीयतेऽनेनेति व्युत्पत्त्या यज्ञानुष्ठानसाधनं यज्ञावचरशब्दस्यार्थः। अत्र च येन यज्ञेननुष्ठीयते स वारणा इत्यभे
दृष्टप्रतीतेर्यज्ञोद्देशेन तत्साधनपात्रपरिच्छेदद्वारा वारणत्ववैकंकत्वजात्योर्विधानेन पत्रजुह्वादौ जातं पनर
विधानं तत्रानिवेशि पि उलूखलमुसलादिषु नहि ध्यविरोधः। नत्रापि नत्वेते न जुहुयादिति वाक्यशेषमूत

क

पर्युदासवशाद्यज्ञांगप्रक्षेपास्य होमव्यतिरिक्तसाधनयात्रद्वारा वारणास्य तथा जुहुयाद्वैतेनेत्यधिकरणमालातिरि
तवाक्यशेषवलाद्यज्ञांगप्रक्षेपरूपहोमसाधनपात्रद्वारा वैकंकतस्य निवेशकोस्तु मे पूज्यपादाः। न्यायसुधायां तु वै
कंकतस्यासर्वयात्रकार्यार्थत्वमुक्तमिति शेषः। प्रदेशांतरे इत्यस्य कृत्स्नस्वरूपमेव व्यक्तीकरिष्यते। तत्रवाजपेयांगत्वे
नावगतस्य सप्तदशारत्नित्वस्य तत्रासंभवात्तदंगपशुयागावतारेऽभिहितेनैव न्यायेनाभिक्रमणोपव्यानयोः क
र्मांगभूतकर्त्रवतारे सिद्धे तत्रैव कर्मविशेषांगकर्तृसंस्कारद्वारविशेषविचारात्पर्यवसितस्यानर्थक्यात्तदंगन्यायस्य
पवमानेष्टीनां वार्तिककारमते आधानांगत्वेपि यज्ञत्वाभावान्नाधानप्रकरणपठितानां पात्राणां तास्ववतार इत्याप
वादिकी भाष्यकारमते तु प्रासंगिकी मतंतरसंगतिं तथा गोणाभ्यक्तिविनियोगोपयोगिविचारेणापादसंगतिं तथा सं
शयं च स्पष्टत्वाददर्शयपूर्वपक्षमेवाह। तत्रेति। यज्ञस्वरूपे आनर्थक्यप्रसक्तावपूर्वसाधनत्वलक्षणार्थप्रकरणानु
प्रवेशप्रसक्ते प्रकृतापूर्वसाधनस्याधानस्य यज्ञत्वाभावादाधाने निवेशासंभवात्तस्मिन्नप्यानर्थक्यप्रसक्तौ तदंगाभू
ता तानां पवमानेष्टीनामंगत्वौराव प्रकृतापूर्वोपकारकत्वसंबंधेन यज्ञपदेनोद्दिश्य वारणादिविधानं। यद्यपि प
वमानेष्टीनां प्रदेशांतरे पठितत्वान्नदिशिष्याधिकारोस्त्युपस्थापकस्तथापि प्रधानाधिकारेणैव प्रधानां

शेषाधिते न तत्संबंधिपवमानेष्टुपस्थापनानामानर्थक्यतदंगन्यायेन तदर्थताया विरोध इत्यर्थः। यदाहवनीये जु
२९ होतीत्यनारभ्याधीतवाक्येनाहवनीयस्याधिकरणत्वेन विधीनात्तत्प्रभृत्या द्वितीयार्थलक्षणायां प्रमाणाभा
वात्कथंचित्प्राधान्यकल्पनया पवमानहविषां तदंगत्वकल्पने विश्वजिदादिवत्त्वेन रागमपि तदंगत्वाप
त्तौ निष्फलत्वापत्तेर्यद्यपि तत्तेनांगत्वं नास्य सिध्यति। तथापि प्राधानप्रकरणे भाष्यकारलिखनादाकां
क्षरमत्तामनुमाय तदीयसिद्धान्तमुपपादयति। प्राधानप्रकरणे इति तेन चकल्पितेन वाक्येन नाधिकरणात
29 पादेऽमांगत्वेनाहवनीयविधिः। आहवनीयस्याप्यसिद्धत्वादनेन तत्रागावेवास्यानामित्यत्रैव सप्तम्या
प्राधान्यपरत्वे मंगीकृत्य पूर्णाहुत्यादिहोमासाधारण्येनांगत्वं प्रतीति वाक्येन प्रकरणावाधीनाधीनांगत्व
मित्यावधानसमप्रधानतं पानानर्थक्यतदंगन्यायप्रवृत्तिरित्यर्थः। एतेन श्रौतावधानावरुद्धेऽगत्वेन
पवमानहविषां कथं तदंगत्वापातिवेशादित्ययास्तं आनर्थक्यप्रतिहतन्यायेनास्यापि तन्यायकत्वोपपत्तेः। सर्व २९
प्रकृतीति। एकादशोपं च भिर्युनक्ति यां क्रौयज्ञ इति यज्ञपदश्रवणादग्निं युनज्मि शवसा घृतेनेति पुनक्ती
त्येतद्वाक्यविहितस्याग्नियोगस्य प्रधानमात्रार्थत्वं भाष्यकारेण सिद्धान्तपिष्पते। तदनुरुध्यन्यायसुधाकृतेहा

पियज्ञायदस्य प्रधानयागमात्रवाचित्वस्य प्रसाधनात्तदभिप्रायेण प्रधानभूतसर्वप्रकृतिपञ्चांगत्वमुक्त्वा यज्ञपद
स्य यजतिपर्यायस्यातिरिक्तशक्तिकल्पने प्रमाणाभावात्सर्वस्मैवेति वाक्ये एष वै सप्तदशः प्रजापतिर्यज्ञेष्वन्वा
यत्तेनिवाक्येऽन्वयज्ञपदस्यैव यज्ञपदसंकोचस्यायुक्तत्वादंगप्रधानसाधारणयज्ञमात्रार्थत्वमेव युक्तमिति केचि
त्तु भोकारीत्या सर्वयज्ञांगत्वे वेति पक्षोत्तरमुक्तं द्रष्टव्यं। तदभावेपीति। वारणादीनां पवमानहविरंगत्वनिवारण
मात्रार्थत्वेन तत्कल्पनमयुक्तं तत्कल्पनामंतरेणापि तन्निवारणे न वक्ष्यमाणविधयाऽन्ययज्ञार्थत्वोपपत्ते
रित्यर्थः। सिद्धिरेवेति। नत्वन्यथाहवनीयासिद्ध्वावनारभ्याधीतवाक्येनाहवनीयाधिकरणत्वं प्राप्यते इति
सूचनायैवकारः। यद्यपि पवमानेष्टंगभूतानां प्राकृतानां होमानामतिदेशप्राप्तमुख्याहवनीयाधिकरणक
त्वबाधेपि सति संभवे प्रकृतिदृष्टस्याधानविशेषप्रयोज्यत्वविशिष्टाग्न्यधिकरणत्वस्य बाधे प्रमाणाभावादुक्त
विधाहवनीयाधिकरणकत्वप्राप्तिः संभवति। एवमेव पवमानेष्टंगभूतानां हविःश्रवणापि स्थले पकल्लीक
रणहोमादीनामुक्तविधागार्हपत्यावाहार्यपचनाधिकरणत्वप्राप्तिरुपपादनीयेति तदनुरोधेनाहवनीया
धिकरणत्वविधानोवश्यकत्वाभावसूचनार्थमाध्यानांगभूतानामेवेत्युक्तं। एवं तेषां चा — कृतत्वादुक्त

विधयातदधिकरणत्वाप्रास्येर्थमिदमेव शरणीकरणीयमिति भावः। एवंच प्रकरणात्पवमानेष्टेनामाधांगत्वे
सिद्धेकथंनानर्थक्यतदंगन्यायावतारइत्याशंकायाः प्रधानयज्ञेष्वेव यज्ञपदप्रवृत्तेरंगभूतपवमानेष्टिषुयज्ञ
त्वाभावान्नातदुद्देशेन विहितत्वारणीदेस्तत्र निवेशइति न्यायसुधोपपादिताशयवार्तिकोक्तरीत्यासंभवंत
मपिपरिहारं पूर्वोपपादितकौस्तुभोक्तरीत्यायुक्तंमत्वायेष्वपरिहारांतरंप्रतिजानीते। आधानांगत्वेपिवा
रणादीनामिति। सर्वयज्ञार्थत्वमेवेति। एष वै सप्तदशः प्रजापतिर्यज्ञेत्वापन्नेति विहितप्रजायतिसंज्ञकसप्तद
30 शास्तरणांयज्ञमात्रोद्देशेन विधानात्सर्वयज्ञार्थत्ववदस्यापि तेन रूपेण विधानात्सर्वयज्ञार्थत्वंनतुप्रकृति
मात्रार्थत्वमित्यर्थः। एवंचानर्थक्यतदंगन्यायप्रवृत्त्या पूर्वपक्षस्यासंभवेन तत्परिहारार्थमधिकरणभे
देन सिद्धांतकथनस्यायुक्तत्वात्प्रकरणेसंनिवेशेनुत्कर्षस्य पूषानुमंत्रणमंत्रवदन्यतः सिद्धत्वेनेहतत्प्रसा
धनैवैयर्थ्याच्चपुनः सूत्रारंभवैयर्थ्यशंकायाः निविदांसामिधेन्यंगत्वान्नैनैः सामिधेनीप्रकरणविच्छेदइ ३०
त्याशंकोत्तरत्वेन पूर्वाधिकरणशेषतयायोजनातस्यार्थक्येन परिहारमभिप्रेत्यावशिष्टंप्रयोजनमाह। प्रयोज
नमिति। पवमानहविर्थोनामपि पात्रासादनप्रतिपत्त्यर्थमंतर्धारणान्तरेवोपादानरादर्शपूर्णमासाद्यनुष्ठा

नसंभवेपितेषांदेवान्नाशेदर्शाद्यर्थमनियतत्वस्यप्रकृतिकानामुपादानं पूर्वपक्षे सिद्धांते तु वारणादिप्रकृतीनामेवेति प्रयो
जनमितितात्पर्यार्थः ॥ मिथश्चापूर्ववाक्यात्प्रकरणाद्वा धेडुक्केतत्प्रसंगादापतितस्य क्रमस्य बाधस्यैहापवादादनंतरं संगतिं
पूर्वपक्षे समभ्याहितीयार्थलक्षणाज्जोणक्रिति विनियोगोपयोगिचिंतनेनेत्यादसंगतिसंशयंचस्पष्टत्वादनुक्त्वा वि
षप्रदर्शनपूर्वकंपूर्वपक्षमाह । आज्यभागक्रमे इति । अग्निर्वृत्राणि जंघनदिति प्रथमावर्तो मात्वांसोमासिसत्पतिरि
तिसौम्याद्वितीयावार्त्रघ्नाग्निः प्रत्येनमत्रमतेत्याग्नेयीप्रथमावृधन्वतीसोमगीर्भिष्ट्वावयमितिसौम्याद्वितीयावृध
न्वतीत्येवमाग्नेयसौम्याद्वितीयावृधन्वतीत्येवमाग्नेयसौम्यौ आज्यभागयोर्हौत्रकांडेप्रयाजमंत्रानंतरक्रमेणचतुष्टयमनुवा
क्यात्वेनश्रुतमित्यर्थः । तत्र पूर्वयोर्वृत्रहन्पदप्रयुक्तत्वाद्वार्त्रघ्नीत्वमुत्तरयोर्वृधिधातुयुक्तत्वाद्वृधन्वतीत्वमितिवि
वेकः । विकृत्यैकर्मांतरत्वाद्वेदकप्रमाणाभावात्तत्रैतद्वाक्ययोर्मंत्रविनियोजकत्वासंभवेप्याग्नेयादिप्रधानेषुत
दुपपत्तेर्नानयोर्व्यवस्थार्थत्वमित्यधिकाशंकोत्थानात्पौर्णमास्यधिकरणेनापौनरुक्त्यमभिप्रेत्यपूर्वपक्षमुप
पादयति । लिंगक्रमाविति । तत्राज्यभागयोः प्रतिपद्यनुष्ठानेनकालकृतव्यवस्थयाक्रमावाधायोगात्पौर्णमावास्या
कालीनप्रधानांगभूताज्यभागलक्षणयाव्यवस्थावाच्यासाचलक्षणापत्तेरेवायुक्तो ऽतः पौर्णमास्यमावास्यापद

योः शक्त्या निरूढलक्षणया वा आग्नेयादिपरत्वास्यान्यत्रापि दर्शनादिहापि सत्तम्याप्राधान्यापरत्वं कथंचिदाश्रित्य तदं
गत्वमेव युक्तमित्यर्थः। न च वाक्येन दुर्बलक्रमबाधौचित्येपि न प्रबललिंगबाधो युक्त इत्यत आह दृश्यते चेति। वि
31 लाधिकरणावस्यमाणरीत्या मतौ तन्मंत्रस्याग्निदेवत्यत्वलिंगेन सवनीयांगत्वप्राप्तावपि यद्यप्यन्यदेवत्यः पशु
रित्यग्नीषोमीयांगताबोधकवाक्यैवाद्गाणगते नवक्ष्यमाणबाधवदिहाप्युपपद्यते बाध इत्यर्थः। देवतात्वाभावा
दिति। पौर्णमास्यामग्नीषोमयोर्देवतात्वेप्येकस्य सोमस्य देवतात्वाभावादित्यर्थः। न ह्यत्र पौर्णमास्यां सोमस्य देव
तात्वाभावेपि अग्निप्रकाशकसोमप्रकाशकमंत्रयोः समुच्चयमंगीकृत्याग्नीषोमदेवताप्रकाशकत्वोपपत्तेर्लिंगवि
रो(अनुवाक्य)धः संभवति पुरोनुवाक्यामन्वाहेत्यत्र द्वितीयायास्तृतीयार्थलक्षणायोपादेयानुवाक्यागते कत्वस्य वि
वक्षितत्वात्त्रिष्टुब्वद्वेद्ग्वनुवाक्ये भवत इति विध्यभावादेकस्मिन्कर्मणि पनुवाक्याद्वयानुपपत्तेरिति भावः। अ
न्नचप्रकाशकाशकार्थैर्यायस्तु धाहृतु यथादिनां कालकृतव्यवस्थाखंडनपूर्विकां कर्मकृतव्यवस्थां प्रदर्श्य कालकृ ३१
तस्यैव शास्त्रदीपिकोक्तद्वितीयापक्षावलंबनेन समर्थिततस्यायुक्ततां सूचयितुं व्यवस्थाद्वयेप्यनास्थां दर्शय
ति। व्यवस्था चेति अनेकोद्देशेन विध्यभावेऽनेकस्य विधेयस्यानियमेनोद्देशे प्रसज्जतेऽन्यतरस्यान्यतरत्र विधि

र्थेवस्थापदस्यार्थः। कर्मकृतव्यवस्थापक्षस्यानास्थायामप्यंते लिखनात्तस्यात्वयुक्तत्वं सूचितं पौर्णमास्यधिकरणे कौ
स्तुभे द्रष्टव्यमुपपादितं च मयात तत्रैवेति विस्तरभयान्नेह प्रपंच्यते। यत्वत्र प्रकाशकाराणां ग्न्याज्यभागयोः साक्षात्कालान्वयाभा
वात्पौर्णमास्यां कालेयावाज्यभागौ तयोर्वात्र ग्न्यमावास्याकालेयावाज्यभागौ तयोर्द्वैधचत्याविति व्यवस्थानुपपन्नेः का
लद्वाराच व्यवस्थायां यद्वृष्टेसेति वाक्यात्पौर्णमास्यां दर्शविकृत्यनुष्ठाने वात्र ग्नी प्रसक्ते रमावास्यायां च पूर्णमासविकृत्यनु
ष्ठाने द्वैधचत्ती प्रसक्तेः प्रकृतिवन्नावैवैरूप्यप्रसंगाद्वार्तिके सिद्धांतकोटौ कोलोक्तिः प्रधाने लक्षित कालगतत
त्वपिताकृष्णपरानपौर्णमास्यमावास्यात्वरूपपरेति न्यायसुधाकृदायादिनकालकृतव्यवस्थाद्वषणेवैकृतका
लस्य प्राकृतकालकार्येविधानाद्यथैवाग्नीषोमीपतदंगेपु च पौर्णमासीत्वेन कालविधाने न तद्विकृतौ च विहिते
ऽमावास्याकाले पौर्णमासीस्थानापन्ने प्राकृतानां पौर्णमासीकालीनांगानां संभवं ति प्राप्तिस्तथैव वात्र ग्न्याग्नेपि
नते संभवप्राप्तिः द्वैधचत्यास्तु न तत्रोपदेशानस्तस्य प्रकृतौकृतार्थत्वान्नाप्यतिदेशेन तस्याग्नीषोमीयविध्यंतत्वा
भावात्। किं चाज्यभावात्। किंचाज्यभागयोः साक्षात्कालान्वयाश्रुतावप्यार्थिकाधाराधेयभावरूपसाक्षात्संबं
धसत्वात्कालान्वयोपपत्तिरिति परिहारकरणं। तदप्युक्तं। कालकृतव्यवस्थापक्षे पौर्णमास्यमावास्याकालया

निमित्तत्वेनाथवानन्तत्कालीनाज्यभागलक्षणयोर्द्देश्यत्वेनाचपस्यावश्यंपांगीकारात्तादृशाविकल्पोचोभयस्यापिप्रयो
जकस्याभावेनवात्रैष्यदिप्राप्तेर्दुरूपपादत्वात्।अतएवपर्वांगेषुपौर्णमास्यादिकालस्यांगत्वेनप्राप्तिस्तत्रतद
३२ नुष्ठापकतायावेक्लृप्तकालत्वविध्वंतरेणावाधात्तदभावेप्यंगभूतेकालानुरोधेनप्रधानलोपस्यान्याय्यत्वात्तत्स्या
नायन्तकालांतरेप्यनुष्ठानंतेषांनासुलभं।नहिभेदेनवद्दर्शपूर्णमासाभावेभेदेनहोमस्यप्राप्तिःसंभवति।यद
32 पिकिंचेत्याद्युक्तंतदपिप्रतिपदिक्रियमाणाज्यभागयोरार्थिकस्यापितदाधाराधेयभावस्यासंभवादयुक्तं।अप्र
तएवप्रधानानांप्रतिपद्यनुष्ठानेपितदीयप्रयोगारंभद्वारापितत्कथंचिदुपपाद्यतदाधारत्वंसंभवेदपि।नत्वि
हाज्यभागयोस्तदपिसंभाव्यते।अतएवांगेषुपौर्णमासीकालत्वेसाक्षादनुपपन्नेस्वप्रधानप्रयोगारंभद्वारंकमे
वेत्तेयं।नचतादृशपौर्णमासीकालकत्वेनैवकालकृतव्यवस्थापुक्ता।तथात्वेपौर्णमासीकालीनप्रधानांगभू
ताज्यभागयोरेवोद्देश्यत्वापत्तौकालकृतव्यवस्थाया।अनुक्तिसहत्वादित्यंयुक्तमेतत्परिहारकरणंयदपि
सोमनायेनान्यौव्यवस्थाविधित्वात्तस्यचाव्यवस्थाप्राप्तिमूलकत्वेनतदालोचनेआज्यभागद्वारकत्वसिद्धेः ३२
कालोद्देशेनमंत्रविधानेलक्षणाविशिष्टोद्देश्यांप्रसक्त्याकालकृतव्यवस्थायुक्तैवेत्युक्तं।तदप्युद्देश्यतावच्छे

दकावच्छिन्ने ऽव्यवस्थाप्राप्त्यभावेव्यवस्थाविधित्वनिर्णयस्यैवप्रथमतो ऽसंभवेनाज्यभागद्वारकत्वालाभात्तल्लक्षणाया
आवश्यकत्वान्नापूर्वोक्तदूषणापरिहाराच्चायुक्ततरमित्युपेक्षितंपूज्यपादैरित्यलं। आनंतर्यं।। प्रधानाचये ऽनुवाक्या
नामानर्थक्यापत्तेस्तदंगभूतयोराज्यभागयोः क्रमानुसारेणव्यवस्थोक्तावारणाधिकरणायोदितामर्थक्यात्तदंगत्या
योज्जीवनेकृतेइहापिक्रमानुसारात्प्राप्तायाव्यवस्थायाऽपवादकरणादापवादिकामनंतरसंगतिंतथाद्वितीययाह
स्तमुष्टिवाक्संस्कारार्थत्वेनावगतानांसंनिधानादुपलक्षणाज्यादिद्वारकत्वेनापूर्वसाधनत्वलक्षणादथवासंर्वपदा
र्थद्वारावातल्लक्षणात्तत्तदंगत्वमितिविचारेणाश्च। तिविनियोगोपयोगिचिंतनेनपादसंगतिंचस्पष्टत्वादुनना।
भिधायविषयवाक्यमुदाहरति। दर्शपूर्णमासयोरिति। हस्तप्रक्षालनरूपंहस्तावनेजनंद्वितीययामलापकर्ष
णरूपदृष्टद्वाराहस्तसंस्कारार्थसत्कर्तृत्वांशेनकर्तृसंस्कारकं। यद्यपिपूर्वमेवप्रश्नांतरमस्तितथापिमस्तितत
थापिमंत्रानेकत्वेस्मृतिद्वैधवद्बुद्ध्यंतरस्याप्यवकाशेनकश्चनविरोधः। अतएवोपयात्यमाणसंस्कारस्यगरी
यस्त्वान्नार्थक्रमेणपाठक्रमेवाधित्वापूर्वपदार्थांगतयाप्यपेक्षितत्वेनसर्वादावनुष्ठानमित्यपिज्ञेयं। एतेन
हस्तावनेजनस्यादृष्टविधयोपकारकत्वमुक्तंप्रकाशकाराणामपास्तं। दृष्टसंभवेतत्कल्पनस्यान्याय्यत्वात्

।उलयेति।ऊर्ध्वेलवनार्हमुगं ध्यादिकठिनातरामूलपशब्दार्थ इति धूर्तस्वाम्यनुसारी न्यायसुधाकारः।उलया वल्व शीरमु
३३ जाग्रो क्का इति हलायुधा उलया वल्वजा इति तु प्रकाशकाराः।उभयथापि तेषां रेखापरत्वर्यायरा ज्याकारतया बर्हि
रास्तरणात्पूर्वं वेदेः क्रियमाणमास्तरणमुलपराजिस्तरणं।मुष्टीति।यजमानकर्तृके मुष्टीकरणावाग्यमे।अदी
कर्त क्षिषायं यजमान इति त्रिः रूपं प्रत्युकथनमध्वर्युकर्तृकं दीक्षितावेदनं।ततश्चावनेजनादिसंस्कृतावेदनं।ततश्चाव
नेजनादिसंस्कृतो नामैषामुक्तकालभाविपदार्थसाधनत्वेनिर्विवादेऽपि किमुत्तरे पदार्थाः अनंतरं यठिता
एव संनिधानादुत सर्वे इति विचार इत्यर्थः।आवेदनरूपमेवेति।यद्यपि भिन्नकर्तृकत्वान्नांगांगिभावसं
भवस्तथाप्याध्वर्यवेऽपि यजमानस्य प्रयोजकत्वेन कर्तृत्वाद्अथवा तत्फले दीक्षितत्वज्ञाने यजमाननिष्ठेन दु
पयोगकल्पनात्तत्संभव इत्यर्थः। स्वोत्तरपदार्थांगत्वमिति।एतेन हस्तावनेजनस्य मलायकर्षणार्थत्वलिं
गाद्धस्तलेपापादकपिंडकरणोत्तरपदार्थेष्वयोग्यत्वेन तत्पूर्वभाविपदार्थांगत्वमिति।एतेन हस्तावनेजन ३३
स्य मलापकर्षणार्थत्वलिंगाद्धस्तलेपापादकपिंडकरणोत्तरपदार्थेष्वयोग्यत्वेन तत्पूर्वभाविपदार्थमा
त्रांगत्वं न्यायसुधाकृदुक्तमपास्तं।हस्तावनेजनप्राभाविमलापकर्षणार्थस्यास्य पिष्टलेपसंबंधिमल

निवर्तकत्वात्कर्तुश्चसांगप्रधानार्थत्वादुपध्यानवत्स्ववीर्थमित्यर्थः।यत्वत्रप्रकाशकारैर्हस्तावनजनवन्मुष्टीकरणावा
ग्यमयोरपिमनःप्रणिधानार्थत्वेनकर्तृसंस्कारकत्वाद्यथापूर्वोवगततत्कालीनपदार्थप्रत्याकल्पनेनतेपू
पयोगस्तथैवपूर्वोवगतकरिष्यमाणसकलांगप्रधानप्रत्याकल्पनेनतद्द्वारोपयोगइतिवाग्विसर्गोगुलिविसर्गोत्तर
कालकरिष्यमाणांगोपेतप्रधानेष्वुपयोगोननुतत्पूर्वभाविष्वेवान्यथाप्रधानांगत्वाभावेप्रकरणेनविनियोगाना
पत्तेरित्युक्तंतदसुक्तमितिसूचयितुमाह।मुष्टीकरणेति।विसर्गोप्राग्भाविमुष्टीकरणावाग्यमयोर्हस्तजिह्वाचापल
निवृत्तिद्वारामनःप्रणिधानार्थयोर्योग्यतावशेनतावदवधिकपदार्थाकलनार्थप्रतीत्यात्तदुत्तरभाविपदार्थाक
लनस्यप्रयत्नांतरजन्यमनःप्रणिधानजन्यत्वप्रतीतेःसत्यपिकर्तृसंस्कारकत्वेयोग्यतारूपलिंगाद्विसर्गपूर्वभा
विपदार्थमात्रांगत्वंन्यायसुधोक्तमेवयुक्तंसत्यपिचतदुत्तरभाविप्रधानार्थत्वाभावेऽप्यानर्थक्यतदंगन्यायेनांगेष्वव
तारसिद्धेरंगार्थत्वेप्रकरणव्यापाराभावेपिनक्षतिरितित्यर्थः।एतेनवार्तिकेमुष्टीकरणादीनांसांगप्रधानार्थत्वस्यप्र
करणाच्चविनियोगस्याभिधानंप्रौढवादमात्रमितिभावः।प्रयोजनंस्वकालेविस्मृतंहस्तावनेजनतुल्यपराजिस्तर
णानंतरंपूर्वैवेपक्षेनकार्यंतथाग्रहमेधीयेडलपराजिस्तरणस्याराडुपकारस्यलोपेहस्तावनेजनस्यलोपश्च

सिद्धं नेतु नूत्तरेष्वप्यंगत्वारूढमेधीये चाज्यभागांगत्वात्कार्यमेवेति स्पष्टत्वान्नोक्तं। शेषस्तु पूर्वाधिकरणोक्तसर्वा
र्थत्वाय वादादायवादि की मनंतरसंगतिसंशयं च स्पष्टत्वादनुल्लिख्य विषयप्रदर्शनपूर्वकं पूर्वपक्षमाह। दर्श
ति। वाक्यभेदापत्तेरिति। पौर्णमास्यधिकरणोक्तरीत्याऽग्निदेवतात्वस्य कारकतासंबंधेन भावनायामन्वयस्य
34 व्येऽचपेः व्युत्पन्नाचयनिर्वंधनवाक्यभेदापत्तिरित्यर्थः। अतोत्र द्वितीययातद्धितार्थस्योद्देश्यताप्रतीतेस्तस्य
चसर्वनामार्थकत्वात्तद्वाक्योपात्ताभावे प्राकरणिकपरामर्शित्वात्प्रकृतहविर्मात्रोद्देशावगतेरग्निसंबंधि
त्वरूपविशेषणस्याविवक्षितत्वाद्धविष्ट्वमुद्देश्यतावच्छेदकमथवा द्रव्यसंकोचपरिहाराय तद्धितस्य संबंधसा
मान्यार्थत्वांगीकारेणाग्नेः कारकत्वाभावेन द्रव्येप्यन्वयव्युत्पत्तेर्विशेषणस्यापि विवक्षोपपत्त्याऽग्निसंबंधिहविष्ट्
वोद्देश्यतावच्छेदकं वक्तव्यं। तादृशोद्देश्यतावच्छेदकरूपाक्रांतत्वस्य सर्वत्राविशेषात्प्रथमे पक्षेऽङ्गप्रधानसा
धारणहविर्मात्रे द्वितीयेऽग्निसंबंधिमात्राज्यंसाधारणेन चतुर्धाकरणसिद्धिरित्यभिप्रेत्य पूर्वपक्षमुपपा ३४
दयति। अपित्विति। अस्तिचेदिति। अग्निसंबंधस्य हविर्निरूपितदेवतात्वाधिष्ठानकत्वरूपस्यैवाश्रयणात्तस्य
चाग्नीषोमीयैंद्राग्नादिष्वपि सत्त्वमित्यर्थः। द्रव्यपरत्वविवक्षायां प्रचुरप्रयोगादनुशासनाच्च देवतात्वविशिष्ट

द्रव्य एव शक्तिकल्पनात् संबंध सामान्यार्थकत्वेलक्षणापत्तेस्तत्परिहारायाग्निदेवताकहविष्युद्देश्यतावच्छेदकत्वां
गीकारेपि प्रकारांतरेणापूर्वपक्षसिद्धिमाह। अस्तुवेति। प्रत्येकमभिसंबंधादिति। यथैव घरपराबानपेत्यत्रकर्मत्वद्वंद्वां
तेविभक्तेः श्रूयमाणत्वात्प्रत्येकं भवत्येवंतद्धितस्याप्यंते श्रवणात्तदर्थदेवतात्वस्यापित्यज्यमानद्रव्योद्देशकत्व
रूपस्यव्यासक्तत्वासंभवाच्चप्रत्येकमेवदेवतात्वांगीकारादिदेवत्वेपितत्सद्भावाश्चतुर्धाकरणंप्राप्येते [illegible]चेत्यर्थः। अखं
डोपाधीति। नेनंदपत्योः कर्तृत्वस्यैवदेवतात्वस्याप्यखंडोपाधिरूपस्यव्यासक्तत्वाविरोधइत्यर्थः। घरपराविस्पत्रतु
तयोरुद्देश्यत्वेनतत्साहित्यस्याविवक्षितत्वात्तत्रप्रत्येकमेवकर्मत्वंप्रयुक्तमितिवैषम्योपपादनायाह। अतएवेति। तस्ये
ति। सूक्तहविषोरिषिरितिस्मरणेनद्रव्यमात्रस्यतद्धितेनानुक्तेरित्यर्थः। नियम्यतेइति। येनहविः परत्वंप्रथमतएवा
वनुध्येतेत्यर्थः। अतोदेवतातद्धितस्यसतः सूक्तहविर्वाच्यत्वनियमकरणादुपजीव्यस्यप्रथमावगतस्यदेवताकत्व
स्यैवापूर्वसाधनत्वलक्षकत्वोपपत्त्याप्रातीतिकोद्देश्यतावच्छेदकात्वमित्याह। अतइति। नचैवमपिवस्यमाणश्रा
तयथश्रुतिमूलेनोभेवाऽविशेषादितिकात्यायनवचनेनाग्नीषोमीपेयितत्वाभेः कथंनस्यागेयमात्रविषयतासि
द्धिरित्यतोनियामकमाह। तेनचेति। तंचतुर्धाकृत्वापुरोडाशंवर्हिपदंकरोतीतिशतपथगतंवाक्यंतच्छेदनपु

रोडाशपरामर्शेण पुरोडाशमात्रस्य चतुर्धाकरणविधायकमेवार्थतो घटतां। एतादृशोपसंहारानंगीकारे शाखांत-
३५ रीयत्वेपि प्रत्यक्षवाक्यविहितस्य पुरोडाशमात्रचतुर्धाकरणस्य सर्वथा बाधायोगाद्विकल्पापत्तिः। आग्नेयपदस्यै-
व पुरोडाशसामान्यलक्षणया तेन सहोपसंहारकल्पने शक्यतानवच्छिन्नपदार्थलक्षणापत्तिश्च। अतः पुरो-
डाशपदस्यैव शक्यतावच्छेदकावच्छिन्नाग्नेयमात्रपरत्वलक्षणायोपसंहारः। अत एवोक्तं सामान्यविधिरस्प-
ष्टः संह्रियेत विशेषत इति। अ। तच्च सामान्यशास्त्रस्य प्रथमप्रवृत्तिकत्वाभावात्फलतः परिसंख्यावांतरभेद-
35
स्तन्मात्रे संकोचरूपोपसंहारः सामान्यवाक्यस्येति श्रुतेरप्याग्नेयमात्रविषयत्वात्कात्यायनवचनं हेतूपन्यासा-
दप्रामाणमित्यर्थः। न च शातपथवाक्ये चतुर्धाकरणान्तरकालत्वविशिष्टबर्हिषत्करणभावनाया भक्षां-
गत्वेन विधानात्क्रमविशेषणतयानूद्यमानस्य चतुर्धाकरणस्य विध्यभावे कथं तस्य तद्विषये सामान्यविधित्व-
मिति वाच्यं। शाखांतरीयत्वेन तच्छाखायामप्रतीत्यभ्युदयशिरस्कत्वफलकल्पनया विशिष्टविध्यंगीकारेण त- ३५
स्यापि विधानोपपत्तेः। एतेन परस्परोपसंहारे सामान्यविधिसार्थक्यसंभवेप्यन्यतरोपसंहारे सामान्यविधिवै-
यर्थ्यमपि परिहृतं। अभ्युदयशिरस्कत्वफलकतया सार्थक्यात्। एवमेकैकशाखीयवाक्यद्वयोपसंहारेपि

द्रष्टव्यं एतेनानुष्ठानाय विशेषापेक्षितत्वरूपास्पष्टत्वस्य पुरोडाशवाक्ये ऽसंभवेपीह बर्हिषत्करणस्य विधानेन च
तुर्धाकरणांशेऽनुवादत्वप्रतीतेस्तस्य च यथा प्राप्त्यपेक्षितत्वात्तस्याश्चाग्नेयवाक्येन विशेषविषयत्वात्सामान्यवाक्य
(न विशेषविषयत्वात्सामान्यवाक्ये)स्य विशेषपर्यवसायित्वेनोपसंहारत्वोपपादनं सोमनाथकृतमपास्तं विशेष
तः प्राप्तत्वेपि सर्वपुरोडाशप्रतिपत्तित्वेन विधित्वसंभवेऽनुवादत्वायोगात्तेन विशेषपर्यवसानानुपपत्तेः अतो
पदेवानेन विधानमारभ्यतेतदेव सर्वसाधारणप्रतिबंधफलमुपसंहारत्वं वक्तव्यं। तत्र चानिर्धारितविशेषत
या विशेषान्वययोग्यत्वरूपास्पष्टत्वस्य सामान्यवाक्ये तदभावरूपस्पष्टत्वस्य च विशेषवाक्ये संभवोस्त्येवेत्यभिप्रे
त्यैवोद्देश्यतावच्छेदकानवच्छिन्नेलक्षणाय त्या सामान्यवाक्यस्य न विशेषोपसंहारकत्वमित्युक्तं पूज्यपादैरिति
भावः। सिद्धांतमुपसंहरति। तस्मादिति। प्रयोजनं तस्य स्पष्टत्वात्रोक्तं॥ ॥इति श्रीखंडदेवांतेवासिकविमंडनशंभु
भट्टकृतायां भाट्टदीपिकाप्रभावल्यां तृतीयस्य प्रथमः पादः॥ ॥श्री०॥ ॥अर्थाभिधान॥ ॥यद्यपि
शब्दत्वसामान्याद्धूतिविनियोगनिरूपणानंतरं वाक्यादिविनियोगनिरूपणं कर्तुं युक्तं तथापि तेषां पूर्वपू
र्वप्रमाणकल्पनेन विनियोजकतया तत्सापेक्षत्वेन लिंगविनियोगोपयोगि निरूपणं पूर्वमावश्यकम

लिंगोपयोगीति। लिंगविनियोगो ५

त एव श्रुतिसापेक्षत्वात्तन्निरूपणोत्तरमेवसरः क्रमप्राप्तत्वादित्यपसरसंगतिं पादांतरत्वादानंतरसंगत्यभावे
३६ प्यक्षतिंचाभिसंधाय निरूपणीयत्वेन पादार्थं प्रतिजानीते। एवमिति। यद्यपि श्रुतेरप्यसमर्थे विनियोज
कत्वासंभवात्सामर्थ्यकल्पकत्वमावश्यकं तथापि लिंगज्ञानं पुरोधाय न श्रुतेर्विनियोक्तृता श्रुतिज्ञानं
36 पुरोवायलिंगं तु विनियोजकमिति न्यायेन श्रुत्याऽकल्पितयाऽसमर्थस्यापि विनियोगान्मंत्रसामर्थ्यापेक्षाऽ
तस्तदुत्तरमेवावसरोत पूर्वमित्यधुनापदेन सूचितौ। [redacted] पयोगीत्यर्थः। तेनवक्ष्यमाणास्वरूपलिंगस्य वस्तु
सामर्थ्यं मंत्रसामर्थ्योभयविधस्यमध्ये प्रथमं तस्य वस्तुसामर्थ्यस्य। प्रमाणत्वेन निरूपितस्येदृक्प्रकारविशेष
चिंतायां असंभवेपि मंत्राधिकारो मंत्रसामर्थ्यस्यार्थप्रकाशनार्थत्वेन विनियोजकतया निरूपितस्यप्र
कारविशेषचिंतासंभवान्मंत्रसामर्थ्यकृतविनियोगोपयोगिनिरूपणस्यपादार्थत्वं प्रसंगात्तु वस्तुसा
मर्थ्यस्य निरूपणं। अतएवेष्वधिकरणे श्रुतिविनियोगविचारेपि पूर्वाधिकरणयुक्त्यादितमुर ३६
व्यार्थविनियोगापवादकरणात्तस्यापवादिकसंगत्यासंगतत्वान्न क्षतिरितिभावः। यल्लिंगविनियोगोप
योगिविचारः प्रस्तूयते तस्य लक्षणमाह। तत्र लिंगमिति। अत्र च केचिदुद्देश्यता कृतिकारकता वाचिपदं यो

रन्यतरवाचिपदकल्पना। कचिच्चोभयवाचिपदयोरपि कल्पनेति दृष्टव्यं। तत्राद्यस्थलमुदाहरति। यथेति। एयेति
। अत एव संस्कारविध्यन्यथानुपपत्तिकल्पित विनियोगस्थले संस्कारनिष्ठोभयवाचिपदकल्पनानुकूलायो
ग्यतो ज्ञेयेति भावः। एवं मंत्रगतलिंगस्थलेऽप्युभयवाचिपदकल्पनानुकूलत्वं दर्शयति। एवमिति।। अत्र च विश्व
जिद्विधेः स्वर्गभाव्यत्ववाचिपदकल्पनानुकूलयोग्यतावत्वेऽपि विनियोजकत्वाभावप्रदर्शनायांगत्वेऽप्रमा
णत्वसूचनाय चांगत्वघटकीभूतेत्युक्तं। सा चेति। तस्याश्चान्यथानुपपत्तिरूपत्वाद्व्यतिरेकव्याप्तिविषयाद्विती
यांनाद्विपदरूपश्रुतिकल्पनद्वारा तदर्थे विनियोगे प्रमाणत्वमित्यर्थः। तत्र दर्शपूर्णमासादिप्रकरणे समा
म्नातानां श्रुत्यविनियुक्तानां मंत्राणामधिकारत्वा। प्रकरणात्क्रतुसंबंधेऽवगते द्वारमात्रविशेषे लिंगेन वि
नियोगः क्रियते। तत्रापि योग्यतारूपस्य लिंगस्य सत्त्वेऽपि देवदत्तस्य पाकयोग्यत्वे आकांक्षाभावे पाके विनियो
गादर्शनादाकांक्षापि सहकारिणी। सा च यथैव मंत्रप्रकरणोक्तस्थाद्वारस्यापि तदभावेऽपि संबंधानुपप
त्तेरेवं च यथैव मुख्यस्य कुशच्छेदनस्य स्मारकाकांक्षया तदंगत्वेन बर्हिर्देवसदनमिति मंत्रो विनियुज्यते तथा
गौणोलपाख्यतृणच्छेदनस्यापि तदपेक्षायां विनियुज्यत एवेत्युभिप्रेत्य पूर्वपक्षमाह। क्रतुप्रकरणेति। न

नुमुख्यार्थानुपपत्त्यभावात्कथं गौणार्थाभिधानेन तत्र विनियोग इत्यत आह। यद्वेति यद्वा। प्रवेशयेत्यत्र मु
ख्यार्थाबाधेपि तात्पर्यमात्रेण लक्षणादर्शनादिहाप्याकांक्षादिरूपतात्पर्यग्राहकसत्त्वेन तदुपपत्तिरित्यर्थः
। मुख्य एवार्थे मंत्रप्रकरणद्वारा आकांक्षामात्रसहकृतेन लिंगेन प्राप्ते श्रुतिकल्पने विलंबितत्वाद्गौणार्थे
निष्ठाकांक्षाया अवसंनवत्स्व तिकारणात याक्रमत्वेन विशिष्टेच्छानाद्युपायांतरेणापि निवृत्तिसिद्धेर्मुख्य एवा
37 र्थे विनियोगो न गौणे न च गौणमुख्यार्थनिष्ठाकांक्षयोर्मंत्रनियामकत्वे विनिगमनाविरहः। गौणार्थेशा
ब्दबोधं प्रति शक्यसंबंधग्रहस्य हेतुत्वेन शक्योपस्थित्या प्राथमिकत्वात्तन्निष्ठाकांक्षया विनियुक्तस्य मंत्र
स्यैनैराकांक्ष्ये सत्यन्यतराकांक्षाया पश्चात्त्यानीयमानगौणार्थसंबंधानुपपत्तेरित्यभिप्रेत्य सिद्धांतमाह। शाक्य
संबंधेति। एतेन मुख्यार्थप्रत्यायनद्वारा गौणेऽपि शक्त्युपपत्तेर्गौणसाधारणैकविनियोजकश्रुतिकल्प
नेनाविशेषादुभयत्र विनियोग इत्यपास्तं। अनुष्ठेयत्वेनावगते परार्थस्मारकापेक्षिणा लिंगेन मंत्रविनि ३७
योगादन्योन्यानपेक्षाणामेव चानुष्ठेयचान्वयेवनैराकांक्ष्यात्पुनः श्रुतिकल्पनाया असंभवात्। यतो मुख्या
र्थस्य प्राथमिकत्वेन तत्रैव श्रुतिकल्पनया नैराकांक्ष्यमत एव तदनुरोधेनार्थिकविधिं प्रकल्प्यापि तत्रै

वविनियोगकल्पनाननुगोणो यथाश्विनोस्त्वावाहुभ्यांसघ्यासमित्यत्रप्रत्यक्षग्रहणाविध्यभावेपितद्धिकल्प
नयातत्रैवमुख्येर्थेविनियोगोवक्ष्यतइत्याह। अतएवेति। ननुकथंप्रकरणेपूषदेवतायात्रभावेमुख्यार्थवाधेसति
पूषानुमंत्रणामंत्रादीनांगोणपावृत्त्याग्निरूपार्थपरत्तयागोणेऽर्थेनविनियोगइत्याशंक्यातत्राविनियोगप्रतिपा
दनेननिरस्यति। यत्रत्विति। प्रकरणेनदुर्वलेनलिंगवाधायोगात्तत्रप्रकरणोएवगोणार्थेविनियोगोपितुय
त्रपूषादेवताचातुर्मास्येतत्रैवोत्कर्षः। उपांशुयाजीययाज्यानांविष्ण्वादिदेवतायाःप्रकरणोःभावेउत्कर्षापत्तिंवा
रयितुंविरोधीत्युक्तं। नत्राग्नेयादियागेनिवेशसंभवेप्यश्रुतदेवतोपांशुयाजेदेवताविधिकल्पनेननिवेशोपप
त्तेः। अतएववसंतादनुमंत्रणमंत्रवदुपांशुयाजेपूषदेवताविधिकल्पनानुपपत्तेराग्नेयादिषुगुणांतरसत्वादुत्कर्ष
एवेत्यर्थः। अत्रचवस्तुसामर्थ्यरूपस्यलिंगस्यसामान्यसंवंधवोधकप्रमाणानिरपेक्षस्यैवविनियोजकत्वं। यथार्थ
ज्ञानस्यक्रत्वंगत्वेमंत्रगतलिंगस्यतुतत्सापेक्षत्तयातत्। अन्यथाक्रत्वंगभूतेर्थेमंत्रविनियोगाभावेकर्मापूर्वसाध
नत्वानपेक्षायांदेवतायांविनियोगापत्तेर्नैष्फल्यप्रसंगेणलिंगमात्रादंगत्वानुपपत्तेरितिसूचयितुंलिंगक्रमसमा
ख्यानादित्यधिकरणावस्यमाणामुपजीव्यसामान्यसंवंधवोधकप्रमाणसत्वेइत्युक्तं। अतएवोक्तंसांप्रदायि

कैः पदंतरेणावत्र संभवत्येव तस्य तदंगत्वं तदनपेक्षं। पदंतरेणा यत्संभवति तस्य तदर्थत्वं सामान्यसंबंधवोधकप्रमा
३८ णसापेक्षमिति। ततश्चास्य यद्यपि नमकरणं सामान्यसंबंधवोधकं प्रमाणं तथापि यागानुमंत्रणमिति समाख्या
यास्तद्वोधकप्रमाणस्य सत्वात्तयाक्रतुसंबंधे सामान्यैर्वृते लिंगेन द्वारविशेषे विनियोगः क्रियत इति नात्रापि श्रुति तो०व० ३
मंतरेणाग्नेः रणार्थे विनियोगप्रसक्तिं यद्यपि प्रकरणादुर्वलेयं समाख्या तथापि प्रवलेन लिंगेन तस्य बाधितत्वा
ल्लिंगेन पूषदेवताप्रकाशनार्थत्वेवगते तत्रानर्थक्यप्रसक्तावपूर्वसाधनत्वलक्षणतात्पर्येणाह कतयोपयु
ज्यत इति प्रवललिंगोपष्टब्धत्वात्प्रवलेति भावः। न चोक्तं यागानुमंत्रणानीति समाख्याक्रतुयोजिनी। तस्माच्छ्रुत्य
नुसारेण प्राप्तिस्तद्देवतेक्रताविति। उत्कर्षस्यापीति। केवलोऽग्नि प्रकाशकस्य मनोतामंत्रस्य केवलाग्निदेवत्ययागसंबं
धवोधकप्रमाणं तरस्याभावाल्लिंगमात्रेणतत्रोत्कर्षस्यासंभवे प्रकरणावगतक्रतुसंबंधनिर्वाहाय तत्रैवाग्निप
देनाग्नीषोमलक्षणयाजघन्यार्थे विनियोग इत्यर्थः। यद्वात्वानर्थक्यतदंगन्यायसहकृतज्योतिष्टोमप्रकरणमे ३८
व ज्योतिष्टोमीयपश्वंगमेष इति सामान्यसंबंधवोधकमिति लिंगाद्याग्नेयसवनीयपशावुत्कर्षः प्राप्नोतीत्यालोच्य
नेतद्वातुयद्यप्यन्यदेवत्यः पशुरग्न्येव्येवमेवोत्ताकार्येतिवाक्येन तृतीयाद्यश्रवणेन श्रुतित्वासंभवाद्वाक्यस्य चलिं

38

गवाध्यत्वेनोत्कर्षनिषेधाप्राप्तावपि एवकारस्याकार्यैवेत्येवंव्यवहितान्वयेनैवकारश्रुत्याऽन्यथावावस्यमाणारीत्याब्राह्म
णवाक्यत्वेनप्राबल्याल्लिंगबाधोपपत्त्योत्कर्षनिषेधादुत्कर्षस्याप्यसंभवेइतिव्याख्येयं।यद्यप्यस्यवाक्येआग्नेयीपदसम
भिव्याहृतैवकारेणावायव्येयशोचोदकप्राप्ताग्नेयमंत्रस्यस्थानेऽनाग्नेयमंत्रप्रसक्तिरूपोहनिषेधकत्वोपपत्त्यानोत्क
र्षनिषेधकत्वमित्यभिप्रेत्यैवमनोतायांतुवचनादविकारइतिदाशमिकाधिकरणप्रवृत्तिस्तथाप्यस्यवाक्यस्योत्क
र्षनिषेधकत्वेनप्राकरणिकफलार्थत्वसंभवेऽप्राकरणिकफलार्थत्वकल्पनायोगादुत्कर्षनिषेधकत्वमेवयुक्तं।दाश
मिकाधिकरणंतुज्योतिष्टोमेऽग्नियःपशुर्नेतिकृत्वाचिंतपाद्रष्टव्यं।अतएवोक्तंतत्ररत्ने।तथासत्यप्रसक्तोत्कर्षनि
षेधायोगादुक्तवचनस्यानूहपरत्वमिति।अनेनैवयुक्तमुक्तंयथामनोतादाविति।प्रयोजनमुलपतृणाछेदनेपिवर्हिर्देवस
दनमितिमंत्रःपूर्वपक्षेसिद्धांतेनेतिस्पष्टत्वान्नोक्तं।वचनात्।पूर्वत्रगौणसामर्थ्यस्यविनियोजकश्रुतिकल्पन
याविनियोजकत्वनिराकरणेनलिंगस्यमुख्यार्थएवविनियोजकत्वेउक्तेऐंद्र्यालिंगस्यगौणेर्थेविनियोजकश्रुति
सहायतयापिप्रसक्तस्यविनियोजकत्वाभावस्येहापवादकरणेदायवादिकामनंतरंसंगतिंतथासंशयंपूर्वाधिक
रणसिद्धांतेनैवपूर्वपक्षोत्थानात्पार्थक्येनपूर्वपक्षेचस्पष्टत्वादनुक्त्वावचनात्वयथार्थमितियथासूत्रंसिद्धांतमेव

प्रतिजानीते। यत्र त्वेति। अत्र भाष्यकारेण निवेशनः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः। देव इव सविता स
३९ त्यधर्मेंद्रो न तस्थौ समरे व न सूनामित्यैंद्र्या गार्हपत्यमुपतिष्ठत इत्युदाहृतं। तदुपमानार्थीयेन नकारेणेंद्रस्योपमानत
या निर्देशादिंद्रस्याप्राधान्यावगतेर्ध्रुवो ध्वरस्तथा सोम आपश्चैवानिलोनलः। प्रत्यूषश्च प्रभासश्च वसवो ष्टौ प्रकी
र्तिता इत्यनलशब्दवाच्यस्याग्नेर्वसुत्वस्मरणादुक्तानां मध्ये ऽग्निर्नाम वसुरिंद्र इव संग्रामे स्थितवानित्यग्निस्तु
तिप्रतीतेर्वसूनां पावकाश्चास्मीति चाग्नेरेव वसुश्रेष्ठत्वस्मरणान्न तत्समीपे न्येषां वसूनां संगमनाद्वसुसंगम
नाद्वसुसंगमनेत्वेनाप्यग्नेरेव स्तुतिप्रतीतेरैंद्रीत्वेनोदाहार्यत्वानुपपत्तेरयुक्तमित्युपेक्ष्य बलाबलाधिकरणभा
ष्यलिखितशाखांतरपठितमैंद्रीमंत्रमुदाहरन्ति। तथाग्नेः करणवचनेतितन्नश्चतस्य मंत्रलिंगस्य स्वरसतो गार्ह
पत्यमिति द्वितीयाश्रुत्युपष्टंभकतया सिद्धांतविपरीतत्वान्न तस्योदाहरणत्वं। यत्तु न्यायसुधाकृता बलाधिक
रणे श्रुत्या लिंगबाधस्य वक्ष्यमाणत्वान्मंत्रस्य स्वरससामर्थ्यानालोचनेनैवेति देवतार्थतद्धितश्रुत्यैंद्र्या बाधा ३९
त्यावगमाद्रामरावणयोर्युद्धमितिवच्चानन्यचरितत्वेनेंद्रस्यापीद्रूपमानरूपस्तुतिसंभवात्तदुदाहरणोपप
त्तिरित्युक्तं। तन्मंत्रस्य स्वरससामर्थ्यत्यागेन स्वस्यैव स्वोपमानत्वनयागोणसामर्थ्यमादायैंद्रीत्वोपपादनेन तस्य

त्वका

तद्धितश्रुत्युपष्टंभकत्वेन तद्धितश्रुत्युपष्टब्धस्वपष्टब्धे लिंगेन कारकश्रुतिसंकोचानुपपत्तेः पूर्वपक्षायोगान्मंत्रस्वरस
सामर्थ्याल्लोचनेनाग्निप्रकाशकत्वात्स्यैवापत्यागोणार्थे विनियोगरूपसिद्धांतविपरीतत्वादयुक्तमित्युपेक्ष्य नच। ने
त्युगुदाहरणो बलाधिकरणोनपोनरुक्त्यं। इह श्रुतिसाहाय्येन गौणार्थे विनियोगेऽपयादितेत त्र केवललिंगमात्रेणे
द्वागत्वमप्यस्त्विति शंकाया निरसनीयत्वेन तत्परिहारोपपत्तेः। अत इदमेवोदाहृतं युक्तमिति भावः। गार्हपत्ये
इति। अग्नाविति शेषः। गार्हपत्यमिति द्वितीयाश्रुत्यविरोधं दर्शयितुं पूर्वपक्ष्याप्रत्यवतिष्ठते। अथेति। स्थित्वेतीति
। इतिशब्देनेदं प्रकाशयेदिति शेषपूरणं सूचितं। गृहयतेरयमिति व्युत्पत्त्या गार्हपत्यशब्द इदं द्रमप्यभिवदितुं सम
र्थ इत्याह। गृहपतिमत्वयोगेनेति। गृहपतिसंबंधित्वयोगेनेत्यर्थः। नच वाच्यस्य पत्तिष्ठतिधात्वर्थस्याकर्मकत्वाल्क
र्थं तत्र कर्मत्वेनाग्नेरन्वय इत्यत आह। यथाचास्येति। अकर्मकाच्चेत्येतदुत्तरसूत्रेणाकर्मकात्तिष्ठतेरात्मनेपदवि
धानेनास्मिन्सूत्रे तिष्ठतिवाच्यस्यापर्थस्य सामीप्यरूपफलावच्छिन्नत्वेन सकर्मकत्वविवक्षणेन सामीप्यस्य प्रति
योगितासंबंधेनाग्न्याश्रयत्वेनाग्नेः कर्मत्वेनान्वयोपपत्तिरिति कौस्तुभे प्रपंचितमित्यर्थः। द्वितीयाश्रुत्या गार्हप
त्यार्थत्वावगमेन नमुख्यार्थे विनियोगसंभवः। योग्यताज्ञानाभावेपि प्रतिबंधकीभूतायोग्यतानिश्चयाभावमा

त्रेणाशाब्दबोधस्य संभवेनाश्रौतविनियोगोपपत्तेस्तस्यैव बलवत्त्वात्तात्पर्यग्राहकस्य सत्त्वेन मन्त्रगतेन्द्रशब्दे यज्ञसाध
८० नत्वसादृश्यादिदं तिधात्वर्थयोगाद्वा जघन्यवृत्त्याश्रयणेवाधकाभावात्। नि ह्नि द्धितीयाश्रुत्या गार्हपत्यांगत्वबोध
स्यैव तद्धितश्रुत्या मन्त्रस्यैन्द्रांगत्वबोधः संभवति। तद्धितोक्तस्य प्राधान्येन प्रतिपाद्यत्वरूपदेवतात्वस्य विशेष्यतया
प्रतिपाद्यमन्त्रे प्रतिविशेषणतया प्रतीयमानत्वेन विपरीतविशेषणविशेष्यभावकल्पनां विनैन्द्रांगत्वस्य शाब्द
80 मप्रतीतेः। इन्द्रोद्देशेन मन्त्रविधावेकप्रसरताभंगापत्तेश्च। इन्द्रस्य च यागेऽनुपयोगेनोद्देश्यत्वानुपपत्तेश्च।
अतस्तद्धितश्रुत्याद्धितीयाश्रुतिवाधायोगाद्गार्हपत्याभिधानार्थत्वमेव मुक्तमित्यभिप्रेत्य दूषयति। नेति। अन्त
स्तस्येति। तद्धितस्येत्यर्थः। रूढित्यागइति। गार्हपत्यशब्दस्य संज्ञायां धेनुष्या प्याइत्यतः संज्ञायामित्यनुवृत्तेर्गृहप
तिना संयुक्ते त्यइत्यनुशासनेनान्यात्पर्यान्तत्वेनाग्नौ रूढत्वात् प्रतीतेस्तत्त्यागइत्यर्थः। यत्तु समीपस्थितिं प्रतिगार्हप
त्यस्य कर्मत्वमभिधानं प्रतीद्रस्येत्युक्तं तदनुद्य दूषयति। नचेति। तथात्वइति।। अस्मिंश्च पक्षे मन्त्रस्यौपचारि ८०
ककरणत्वापत्तेः समीपस्थिते श्च गार्हपत्यसंस्कारार्थत्वेइन्द्राभिधानार्थत्वायोगान्मन्त्रस्य तद्वारोपचारिककर
णत्वस्याप्यनुपपत्तावात्मनेपदानुपपत्तेरात्मनेपदानुरोधेनैन्द्राभिधानार्थत्वांगीकारे गार्हपत्यस्याग्नेउ

पयोगेनेप्सितत्वात्सक्तुवदनीप्सितकर्मत्वेनान्वयासंभवादीप्सितकर्मत्वांगीकारेचोद्देश्यानेकत्वनिमित्तवाक्यभेदा
पत्तेर्द्वितीयांतंततृतीयांतं चयथाश्रुतमंगीकृत्यात्मनेपदतात्पर्यग्राहकानुरोधेनधातुनैवस्वशक्यार्थविशिष्टा
भिधानलक्षणायात्तत्रैवगार्हपत्यस्यकर्मत्वेनमंत्रस्यचकरणत्वेनान्वयांगीकारोयुक्तः।गार्हपत्यस्यचसाधनत्वेन
उपयोगाभावेपिसंस्कार्यत्वेनतत्सत्त्वादभिधानकर्मत्वोपपत्त्यातदनुरोधेनमंत्रगतंद्रव्यदस्यगार्हपत्यपरत्वं
कथंचिदाश्रित्यसिद्धः श्रुतिबलाद्गौणार्थेविनियोगइत्यर्थः।प्रयोजनंस्पष्टत्वान्नोक्तं॥ ॥तथाह्याम्नानं॥द
र्शपूर्णमासयोरिति।सिद्धांतेमंत्रस्यलिंगादाह्वानांगत्वेसामान्यसंबंधबोधकंप्रमाणप्रदर्शनायदर्शपूर्णमा
सयोरित्युक्तं।हविष्कृदेहीति।देवानामर्थेयाहविःसंपादयतिसायत्नाहविष्कृत्।तामेनांसंबोध्याध्वर्युरेहीति
ब्रूतेतमिमंमंत्रमध्वर्युस्त्रिरुच्चार्यावघातंकुर्वन्नाह्वयतीत्यर्थः।अत्रचयथाश्रुतित्यापूर्वाधिकरणोगौणा
र्थेविनियोगोमंत्रस्योक्तस्तद्वदेववाक्येनापितत्रप्रसक्तस्यविनियोगस्येहापवादकरणाद्दायवादिकीमनंतर
संगतिमयावादेनमुख्यार्थेएवविनियोगस्यस्थिरीकरणात्पादसंगतिंचस्पष्टत्वादनुक्त्वापूर्वसिद्धांतहेतुप
रसूत्रगतंतथाशब्दंव्याख्यास्यन्पूर्वपक्षमाह।तत्रेति।पत्न्येवहविष्कृदुपोत्तिष्ठतिदेवान्हषीन्पितृन्साभि

दुत्पावहंतातिवा कंप्यातरेपत्नीस्त्वयमेवोन्निष्ठतिनाहृते त्यर्थे कैवकारेण पक्षप्राप्ताह्वाननियमाभावप्रतीतेराह्वानवि
ध्यंतरस्यानन्यथासिद्धस्याद्दर्शनाद्दविहिताह्वानस्मारकतयामंत्रस्यांगत्वेनविधानानुपपत्तिंतावद्दर्शयति। तस्य
४१ पत्न्येवेति। एतेन मंत्रेत्रिरभ्यासविधिः सहायार्थत्वात्तस्यप्राप्तावघातकालानुवादद्दुत्स्यप्यपास्तं। आह्वानांगत
यामंत्रस्याप्राप्तेस्तत्रत्रिरभ्यासविध्यनुपपत्तेः काललक्षणापत्तेश्चा। अतः परिशेषाद्दलक्षणाहेत्वोः क्रियायाइति
41 सूत्रेणप्रयोजकत्वावरूपयोगहेता [illegible] वपिशातृप्रत्ययस्य तेरभिचरन्यजेतेतिवन्मंत्रस्यावघातभावनां
गत्वमेवऽङ्कुदुपात्तभावनायामपि कारकावयस्य खुत्पन्नत्वेसुतरामिति करणपरामर्श मंत्रस्य करणतया
न्वयोपपत्तेरित्यभिप्रेत्याह। अतइतिप्राप्तावघातोद्देशेनत्रिविरभ्यासमंत्रयोर्विधानेवाक्यभेदापत्तिंपरिहर
ति। अवघातस्यवितुषीभावपर्यंतमनुष्ठानावश्यकत्वेननत्रत्रिरभ्यासविध्यानुपपत्तावपितस्यमंत्रह्वाण
अतश्चेति। पुंस्त्वस्यवक्रियोपपत्तेः शाखाभेदेनक्वचित्त्रिरभ्यासयुक्तमंत्रपाठेनत्रिरभ्यासप्राप्तावपिशाखांतरेसकृ ४१
त्पाठेनाप्याम्नानान्नियमविधयान्निरभ्यासादिविशिष्टावघातविधिरेव। नत्वत्रपत्नीवाक्येनावघातः
प्राप्यते। तत्रसमाख्याप्राप्ताध्वर्युकर्तृकत्वस्यपत्नीकर्तृत्वेनवाधेनावघ्नन्निति पुंस्त्वानुवादानुपपत्तेः। अ

तो विशिष्टविधानान्न वाक्यभेद इत्यर्थः। अत एव गुणात्पत्नीवाक्ये ऽवघातान्तरविधिरित्याह। पत्नीवाक्ये चेति
। अत्र च विधिकोटावुपदेशः स्यादिति सिद्धान्तसूत्रेण मन्त्रस्यावघाताङ्गत्वे ऽवरक्षो दिवः सपत्नमिति मं
त्रान्तरस्यापि विधानाद्धविष्कृन्मन्त्रस्य पक्षे बाधः पूर्वपक्षे आयायादिति तं परिहरति। पत्नीकर्तृके इति। एवं चाह्वय
यतिपरलिङ्गाविशिष्टावघातविधिः। धातुराख्यातांशश्चानुवाद इत्यभिप्रेत्योपसंहरति। अतश्चेति। ननु अवघा
तस्याचेतनस्य हविष्कृत्वानुपपत्तेः सुतरां चेहिशब्दार्थान्वयानुपपत्तेरवघाते मन्त्रस्य सामर्थ्यात्कथं विनियोग
इत्यत आह॥ गौण एवायमिति। गौणत्वोपपादनमिति। अचेतने स्वातन्त्र्यलक्षणकर्तृत्वासंभवेऽपि स्थाली पच
तीतिवद्वैवक्षिके न स्वातन्त्र्येण कर्तृत्वोपपत्त्या हविष्कृत्वसंभवात्तत्रैव चेतनत्वमारोप्य हे ऽवघात त्वमेहि संयत्तो भ
वेत्यर्थेन हविष्कृत्फलासंबन्धिहविःसंयत्तिहेतुलक्षणागुणयोगेन हविष्कृदेहीत्यनेनावघातप्रकाशनोपप
त्तिरिति को ऽस्तु भेद इष्टव्यमित्यर्थः। मन्त्रस्याह्वानाङ्गत्वे आह्वयत्यन्वयायोगशंकापरिहारायाह। आह्वयतिश्चेति
। हविष्कृदेहीति मन्त्रे एहीति शब्दोच्चारणादध्वर्युराह्वानमाचष्ट इत्यर्थं तत्करोति तदाचष्ट इति स्मृत्या णिजं
व्युत्पाद्याह्वयतिप्रयोगोपपत्तेः शक्यार्थबोधकालीनाह्वानप्रकाशनानुवादानाह्वयत्यन्वयोपपत्तिरित्यर्थः

वचनस्यमुख्याह्वानसंबंधेनाप्युपपत्तेर्मुख्यविशेष्यभूताह्वानभावनासंबंधस्याभ्यर्हितत्वात्त्रिभिरित्यस्यावघाते
ऽन्वयानुपपत्त्याऽप्रकृतमंत्रपाठक्रियाविषयत्वापत्तेर्द्योततोः साधुत्वयारार्थ्येविशिष्टविधिगौरवापत्तेर्वि
नाकारणामाख्यातस्याचष्टे इत्यर्थलक्षणापत्तेर्नोवघातेगोणोविनियोगः किंत्वाह्वानेएवेन्यमभिप्रेत्य
सिद्धांतमाह। मुख्यएवेति। आह्वानस्याविहितत्वात्तदंगत्वेनमंत्रविधिःसंभवतीत्यारुणकामयाकरोति।
42 मांत्रवर्णिकेतियथा। सोमपात्रेमग्रहीत्वापिसोमभक्षणप्राप्तेरश्विनोस्त्वाबाहुभ्यांसघ्यासमितिमंत्र
वर्णप्रकाश्यत्वानुपपत्त्याग्रहणनियमविधिंप्रकल्प्यतेएवमिहापितत्प्रकाश्यत्वानुपपत्त्याह्वाननियम
विधिकल्पनयाह्वानस्यविधेयत्वावगमात्तदंगत्वेनमंत्रविधानोपपत्तिरित्यर्थः। एतेननित्यप्राप्तत्वेपि
प्रथनादिवदध्वर्युकर्तृकत्वसिध्यर्थमाह्वानस्यापूर्वविधिरितिन्यायसुधाकारोक्तमपास्तं। विधेयांतरसत्वे
संभवत्याप्तिकापाक्रियायाविधेर्गौरवान्मंत्रपाठस्याध्वर्युकर्तृकत्वेकपृथक्प्रयत्नानायाद्ये आह्वाने ४२
ऽध्वर्युकस्याप्यर्थतः प्राप्तेश्चविधिनस्यतुप्रकाशनरूपमंत्रव्यापारतोऽत्यंताभिन्नत्वात्क्रियांतररूपत्वेन
मंत्रस्याध्वर्युवससमाख्ययाध्वर्युकर्तृकत्वनियमेपिनतत्कारणत्वेनाध्वर्यवनियमःसिध्यति। आह्वानस्य
कल्प्यतत्रमंत्रविनियोगः ६

तुपरोगमनानुकूलस्वाभिप्रायप्रकाशनरूपत्वात्तस्यचेहमंत्रव्यापाररूपत्वेन मंत्रोच्चारयितृव्यतिरिक्तेनानुष्ठातुमे
वाशक्यत्वान्मंत्रस्याध्वर्युकर्तृकत्वेनैवाम्नानस्य तत्कर्तृकत्वसिद्धेरितिविशेषस्याप्राप्तत्वाद्विध्यर्थमपिविधिरावश्य
कइत्यर्थः। पत्न्येवेकारेणाम्नानमियमनिवृत्तिप्रतीत्यापूर्वकानिरस्यते। पत्न्येवेत्यस्येति। नान्येइति। एतेनयत्न्यावा
क्यांतरेणकर्तृत्वेनविधानात्समाख्याप्राप्ताध्वर्युकर्तृकत्वस्यवाधावगतेरध्वर्योस्तूखलउकृष्णाजिनानुत्स
र्गविधानात्तद्वाराष्वारंभकर्तृत्वेपिकर्तृत्वोपचारेणतत्कर्तृकत्वंसूचितंसहायार्थत्वेनेति। पत्न्याववहुपदार्था
नुष्ठानेनश्रांतस्याध्वर्योरवसरदानेनसहायत्वादन्यपदार्थकालेपितत्प्राप्नोतितथापिहविष्कृत्वेनतदाम्नान
स्यहविष्करणार्थत्वप्रतीतेस्तस्यचावघातमारभ्यप्रवृत्तेरवघातकालएवप्राप्तत्वादनुवादइत्यर्थः। यद्य
प्यवघ्नित्यत्रकाललक्षणापततितथापिलक्षणाहेत्वोक्तियायाइतिसूत्रेणशातुः शयानाभुंजतेपव
नाइत्यत्रेवलक्षणार्थत्वप्रतीतेरवघातकर्तृत्वावस्थायत्रस्याम्नानकर्तृत्वावगंतेस्त्वारंभद्वाराऽध्वर्युक
र्तृकवर्तमानावघातस्यकालिकसंबंधेनाम्नानचिह्नत्वप्रतीतेरवघातकालेप्राप्तयतीत्यर्थात्काललक्ष
णाशतृप्रत्ययोपात्तलक्षणात्वघटकतयाऽनुशासनशिष्टत्वान्नदोषावहा। वस्तुतस्त्वनुत्सर्गमात्रेणावघा

तकर्तृत्वासंभवाद्व्वारं भद्वारा तदा अपरोवहंतो लक्षणापत्तेर्नोपलक्षणो शतृप्रत्ययः। किंतु हेतावेवात्र ततश्चावघा
४३ तार्थमाह्वयन्तीत्यर्थो दाह्वानकर्तृत्वसमानाधिकरणावघातकर्तृत्वे प्रयोजकत्वरूपमेवा अयितुं युक्तमित्य
वघातफलाह्वानस्यावघातकाले एव प्राप्तेर्विनैव लक्षणामवघातं कारयन्त्याह्वयन्तीत्यर्थेन कश्चिद्दोष इ
ति भावः। यत्तु वकाशकाराणां पत्न्या अन्वारंभविधानेनावघातेऽध्वर्युकर्तृत्वोपपादनं तत्कास्मिंश्चिदपि
43 कल्पसूत्रे पत्न्या अन्वारंभविध्यदर्शनादयुक्तमित्युपेक्षितं पूज्यपादैः। ममतु प्रतिभाति त्रिर।वघ्नत्रिति
सिद्धानुवादेनावघातेऽध्वर्योः कर्तृत्वोऽभ्यनुज्ञानादवघातं कुर्वंतेवाहूतपापत्न्या हुतीयावघातानुष्ठानोप
यत्तेरेवकारस्य सहायमात्रनिषेधकत्वेनोभयकर्तृत्वाविरोधरावकात्यायनसूत्रसंवादी युक्तः। तोपि मोरो वता
वघातेन मंत्रविनियोग इति मीमांसकसिद्धान्तस्याक्षतिः। अत एव कातीयानां पूर्वमध्वर्युकर्तृकमवहननम
परं चाह्वानोत्तरं पत्नीकर्तृकं चेत्यनुष्ठानं दृश्यते। एवं च शतृप्रत्ययस्य लक्षणात्वाथादिकल्पनमपि
नाश्रितं भवतीति। आवितुषीभावमवघातानुष्ठानेमध्येसहायार्थमाह्वानं दृष्टार्थमपि भवतीति। त्रिरभ्या ४३
समात्रमिति। सोपि च क्रियाभ्यावृत्तिगणनार्थकसुच्प्रत्ययं तन्त्रिः शाब्दवलाद्दाह्वानक्रियायामेव विधीय

तो तत्र च मंत्रस्य वेदिं पुरीषेण मंत्रन्यायेन सकृत्पाठे प्राप्तेऽपि प्रोक्षणावदानस्य मंत्रयाजतिरिक्त प्रयत्नानापद्यत्वेनार्थो
न्मंत्रस्यैव त्रिरावृत्तिः फलति। एतेन पत्नीपसुधाकृतान्यहितसंबंधमादाय मंत्रस्यैव त्रिरावृत्तिविधानमुक्त
मपास्तं। त्रिरभ्यासस्य शब्दतो व्यवहितस्यापि सुच्यत्वपक्षे त्वेवकारैकविभक्तिपक्षे त्वेवाद्धानक्रियासंबंध
लाभाद्व्यवहितेनापि मंत्रेण संबंधानुपपत्तेः। अतश्चाद्धानस्य दृष्टार्थत्वाद्धोकवदेव द्विस्त्रिश्चतुर्वापि प्राप्तौ
त्रिरभ्यासेंशेपि नियमविधित्वलाभात्त्रिरभ्यासमात्रमाद्धाने विधीयते इत्यर्थः। सिद्धांतमुपसंहरति। इतीति
। एवं च गौणार्थे विनियोगस्य वाक्यकृतस्य लिंगेन वाधन्मुख्य एवार्थे विनियोगः। सिद्धांतमुक्त्वा लिंगवाधा
द्गौणार्थे विनियोग इति सिद्धमित्यर्थः। प्रयोजनं पूर्वपक्षे पत्नीकर्तृकस्याध्वर्युकर्तृकावघातस्य च विकल्पे
सति हविष्कृन्मंत्रोऽध्वर्युकर्तृकावघाते अवरक्षो दिव इति पत्नीकर्तृके इति व्यवस्था। सिद्धांते त्वेकस्मिन्नेव प
त्नीकर्तृकावघाते ऽवरक्षो दिव इति मंत्रः। हविष्कृन्मंत्रस्त्वाद्धान इति स्पष्टत्वान्नोक्तं॥ ॥तथोत्थान॥ ॥
उत्तिष्ठन्निति। वहिष्पवमानदेशादुत्तिष्ठन्नित्यर्थः। सामान्यसंबंधकारि प्रमाणमस्त्वसूचनाय सोमे इत्युक्तं। वि
हरेतीति। इति करणेन प्रभृत्यर्थकेन बर्हिस्तृणी हि पुरोडाशानलंकुरु पत्न्युन्नोदेहीत्येतस्य संग्रहः। अन्तेह

एउन्नेतीतिशब्दो मन्त्रस्वरूपपरः। सोत्र विसर्गशब्देन वाचं विसृजतीति वदन्यस्यापि विसर्गस्योपादानसंभ
४४ वादेकादशे भाष्ये वाग्विसर्गो हविष्कृतावीजभेदेन तथास्यादित्यधिकरणे हविष्कृद्ग्रहणे च काललक्षणार्थ
मित्युक्तं तथाह्वानमपीति चेत् न कालविधिश्चोदितत्वादित्युक्त्या सूचितत्वाच्चात्र भाष्ये ऽनुदाहृतमप्यन्यदु
दाहरति। दर्शपूर्णमासयोरिति। तां नियमितां वाचं हविष्कृदेहीति मन्त्रपाठकाले विसृजतीत्यर्थः। तत्र कि
44 मनयोर्वचनयोरुन्निषत्रितिवाचं विसृजतीति चोद्दिश्यानयोर्मन्त्रयोर्विधानादनयोर्मन्त्रयोर्गौणोत्थान
वाग्विसर्गयोर्विनियोगः उत मन्त्रयोर्लिङ्गादग्निविहरणव्रतकरणरूपमुख्यार्थे विनियोगः। उत्थानव्र
तमन्त्रयोः कालार्थत्वेनोपादानमिति मुख्यं। वक्ष्यमाणत्वेनातिदेशिकीं संगतिं पूर्वाधिकरणपूर्वप
क्षत्वात्पूर्वपक्षं च स्पष्टत्वादनुक्त्वा ख्यातिदेशिकीसूत्रानुरोधात्सिद्धांतमेवाह। तत्रापीति पूर्ववदेवत्व
नेनसोत्रतथाशब्दसूचितातिदेशिकीसंगतिर्दर्शिता। तत्र पूर्वत्र मुख्याक्रियांतरसत्वात्तस्याश्चसा ४४
धुत्वमात्रार्थत्वे प्रमाणाभावादवघ्नन्तित्यस्य लक्षणां विनापि हेतुत्वो यदर्थतयोपपन्ने स्त्रिरभ्यासस्य च वि
धेयो तरस्य सत्वेन प्रबलस्यापि ब्राह्मणवाक्यस्यान्यथोपपत्तिसंभवाद्युक्तो लैंगिको विनियोगः। प्रकृते

तुविधेयांतराभावेऽनिष्टत्वात्तस्य लक्षणार्थत्वमंगीकृत्य कालस्यैव तत्त्वमंत्रे विधेयत्वाद्धि धोलक्षणापत्तेरुत्था
नस्य च सामर्थ्यात्करिष्यमाणदेशांतरविहितकार्यार्थत्वे कृतार्थस्य मंत्रपाठार्थत्वायोगेन शक्तप्रत्ययस्य करण
त्वरूपहेतुत्वार्थकत्वासंभवादगत्या फलत्वरूपहेतुत्वार्थकत्वमंगीकृत्य मंत्रपाठस्यैव गोणात्मामर्थ्येनोत्थानां
गत्वं युक्तं। संभवति चानुत्थितेनाग्नीनामेधितुं विहर्तुं वा शक्यत्वादुत्थानस्याग्नींधनविहरणादिहेतोः स्वातंत्र्यवि
वक्षया मुख्यतत्कर्तृत्वोपपत्तेरग्नीच्छब्देनाभिधानं न चाध्वर्यूत्थानस्याग्नीध्रकर्तृकाग्नींधनादिसाधनत्वा
योगात्तन्निमित्तकर्तृत्वविवक्षानुपपत्तिः। विहरेत्यस्य प्रैषत्वे सति प्रैषेषु पराधिकारादिति न्यायेनाध्वर्युकर्तृकता
पावाधेपीर्थैः ह पूर्वपक्षे इति करणरूपवाक्यावगतोत्थानांगत्वेन प्रैषत्वाभावे नाग्नीध्रकर्तृत्वाप्राप्त्या
समाख्याप्राप्ताध्वर्युकत्वस्यैव प्राप्तेर्बाधकाभावात्। अत एवाग्निविहरणादिसाधययोरः प्राप्तकालतार्थता
मंगीकृत्य विहरणस्य प्राप्तः कालइत्यर्थकतयाग्नीद्विहरेत्यस्याप्युपपत्तिः। व्रतवाक्ये तु शृतत्पयस्याप्यभा
वादिति करणास्य वाक्यत्वेन लिंगापेक्षया दुर्बलस्यापि ब्राह्मणवाक्यत्वेन प्राबल्याद्युक्तमेव वाग्विसर्गो गतं
।तत्रापि यथा भक्षानुवाके वाकूजुषाणा सोमस्य तृप्यत्विति भक्षयितृगतं तृप्तिकर्तृत्वं तृप्तिहेत्वास्य गता

यं वाच्युपचरितं तथाक्तविहिंसायामितिक्तविधात्तोर्वोच्य हिंसागतनाशकत्वसाम्याद्धो एषामक्षणावगतेर्य
४५ जमानपुरुषगतं व्रतशब्दवाच्ययस्य वृत्त्यर्थपयोयवाग्वादिभक्षणकर्तृत्वंभक्षणहेतास्य गतनायांवाचिश
क्यमुपचरितुं। वहुवचनं च वा[redacted]चः शब्दात्मकत्वाछब्दस्य चनात्मादिषष्ठसुस्थाने षभिव्यक्तेस्ताल्वा
द्यधिष्टानमभेदाभिप्रायेणापिशक्यंयोजयितुं। लोटश्च वाचोऽप्रेष्यत्वेन प्रैषार्थत्वासंभवेपि पूर्ववदेव प्रा
प्तकालतार्थे तांगीकाराद्धेवाकूव्रतं भक्षयितुतव प्राप्तः काल इत्यर्थेन संभवत्वेव गौणार्थे वाग्विसर्गविनियो
45 ग इति विशेषाशंकपासंभाव्यमानं पूर्वपक्षं निराकर्तुमाह न तु गौणयोरिति। इतिकरणस्येति। नस्याव्ययत्वेन लुभवि
भक्तिकत्वाछक्यकरणत्वानुक्तेर्लक्षणायां च कालिकसंबंधावछिन्नसमर्थलक्षणायाएवयुक्तत्वान्नान
पेक्षितांगांगिभावपरत्वाश्रयणं युक्तमित्येतन्मंत्रपाठ कालेवाचं विसृजतीत्यर्थेत वेत्यर्थः। एतेनेति करणस्य
श्रुतित्वमंगीकृत्य पूर्वपक्षे श्रुत्या गौणमंत्रविनियोग इति न्यायसुधोक्तमपास्तं। इत्थंभूतलक्षणेति। हविष्कृन्नं ४५
त्रपाठज्ञाप्यत्वेस्येव विसर्गे उपपत्तेर्न स्वातंत्र्येण तत्र करणतया मंत्रविधानं युक्तमित्यर्थः। एतच्चेत्थंभूतलक्ष
णार्थत्वांगीकरणे सहशब्दाभावेपि सिद्धांतोपपत्तिदर्शनमात्रार्थं वस्तुतस्तु सहशब्दश्रवणेन तद्योगे एव न तीयोप

पत्नेर्मंत्रपाठसमकालीनत्वरूपसाहित्यस्यैव प्रतीतेर्नेमंत्रकरणत्वाशंकापीति ध्येयं। अतश्चोत्तरपदार्थे विधिपाठ
क्रमेणोपयोत्स्यात्तस्य कालो निर्ज्ञातस्तथैव मंत्रपाठक्रमेणाहविष्कृन्मंत्रयोरपि निर्ज्ञान इति तत्रा प्राप्तकालविधा
नमेवेत्युपसंहरति। अत एवेति। यद्यपि चाह्वानस्य मंत्रपाठातिरिक्तपृथक्प्रयत्नानापाद्यत्वेनान्यथानुपपत्त्या
तत्पाठार्थे वाग्विसर्गः प्राप्नोत्येवेत्यनुवादत्वमेव युक्तं। नतु कालविधित्वं तथापि तन्मात्रांशे वागपमवाधेपि
तदुत्तरमपि प्रसक्तस्य तस्य निवृत्त्यर्थमवधिरूपकालविधित्वमावश्यकमित्याशयः। यद्यपि च पूर्वत्राकाला
नुवादादिह च विधेयत्वान्न पूर्वोधिकरणातिदेशार्थेत्तातथा शब्देक्ता युज्यते तथापि गौणो न विनियोगः।
किंतु मुख्य इत्येतावतासाम्येन तदुपपत्तिरिति ज्ञेयं। प्रयोजनं पूर्वपक्षे ऽग्नीन्मंत्र उत्थानात्पूर्वं प्रयोज्यः एवं व्र
तहविष्कृन्मंत्रावपि वाग्विसर्गात्पूर्वं प्रयोज्यौ। करणत्वात्। सिद्धांते तु उत्थानकाले ग्नीन्मंत्रः। व्रतहविष्कृ
न्मंत्रपाठसमकालं वाग्विसर्ग इत्यादि स्पष्टत्वान्नोक्तं॥ ॥सूक्तवाके॥ ॥दर्शपूर्णमासयोरिति। मंत्रस्य
सामान्यसंबंधबोधकप्रमाणाप्रदर्शनार्थमेतदुक्तं॥ इदं द्यावापृथिवी भद्रमभूदित्यादिनमो देवेभ्य इत्यंतो
निगदरूपो मंत्रः सूक्तवाकस्तस्य च सूक्तवाकत्वमग्रे व्यक्तीकरिष्यते। तेन मंत्रेण प्रस्तरं दर्भमुष्टिमग्नौ प्रक्षि

पत्तीति वाक्यस्यार्थः। तत्र गोणसामर्थ्यस्य श्रुतिसहकृतया विनियोजकत्वेऽभिहिते मुख्यसामर्थ्यस्यापि त
४६ त्सहायतानिरूपणेन पूर्वं। उक्तस्य कालार्थसंयोगस्येहापवादकरणेन च पादाध्यायानंतरसंगती स्तथा
सूक्तवाकस्य कालोपलक्षणतयान्वयेन कालार्थः संबंधः होत्रास्मिन्मंत्रे पठ्यमानेनत्याठकाले प्रस्तरं प्रहरेदि
त्यथवा सूक्तवाकस्य करणतयान्वयेन प्रहरणांगत्वमिति संशयं च स्पष्टत्वादनुक्त्वा पूर्वपक्षमेवाह। तत्रेति
। इष्टदेवतेति आज्यभागाद्यनूयाजांतेषु कर्मसु उद्दिष्टाग्न्यादयो देवता इत्यर्थः। उपयुक्तेति। प्रस्तरे जुह्वा
सादयन्ति स्रुवो वा स्रुचश्च इति वाक्येन स्रुकाधारणे उपयुक्तप्रस्तरप्रतिपत्तित्वेनेत्यर्थः। कृतार्थत्वमेवत्याकांक्षा
विरहसंपादनेनांगांगिसंबंधविघटकमित्यतस्तमेव सूत्रोपात्ततयाहेतुमाह। कृतार्थत्वादिदिति। एवं च
चातुर्थिकन्यायेन कालार्थसंबंधं दृष्टांतव्याजेन साधयति। दर्शपूर्णमासाभ्यामिति। यद्यप्यत्र दृष्टांत इव काला
र्थसंबंधबोधकः। क्वा प्रत्ययो नास्ति तथाप्युभयत्रापि कृतार्थत्वे पूर्वोक्तरीत्या कालार्थतापादने हेतुः क्त्वा ४६
प्रत्ययस्तु कालविशेषपौर्वापर्यरूपेनियामकमात्रार्थ इति न दोषः। कथं तर्हि करणत्वपरतृतीयोपपत्तिरि
त्यत आह। तृतीया चेति। इत्थंभूतलक्षणे तृतीयेत्यनुशासनेन गमकत्वरूपलक्षणार्थत्वेन सूक्तवाकद्वत्तिग

मकत्वाभिधानात्तस्य च तत्कालीनत्वसंपादनेन संभवात्तृतीयोपपत्तिरित्यर्थः। लक्षणात्वार्थे त्वे लक्षणापत्तिं।
निरस्यति नैवमिति। एतेन ज्ञानजनकत्वरूपलक्षणात्वाभिधानेनैव ज्ञानक्रियायाउपात्तत्वाघदनुपात्त
ज्ञानरूपक्रियाद्वाराक्रियासंबंधस्योपात्तभावनानिरूपितकरणत्वापेक्षयाविलंबितत्वेन कारकविभक्त्यपे
क्षयेत्थंभूततृतीयायादौर्बल्यंपार्थसारथ्यादिभिरुक्तं तदपास्तं। नापि गमकत्वस्याकारकत्वाद्धात्वर्थान्वयप्रती
तेः। प्रधानभूतभावनानिरूपितकारकत्वपिक्षपादौर्बल्यं। अकारकस्यापि निमित्तादेरनुष्ठाप्यत्वसंबंधेनभा
वनान्वयवद्गमकत्वस्याप्येककार्यकारणाभावकल्पनालाघवानुरोधेन स्वजन्यभावनाज्ञानविषयतासं
बंधेनभावनान्वयोपपत्तेस्तुल्यत्वादिति भावः। एवं च पूर्वोक्तप्रैषमंत्रवदिह प्रहरणेमंत्रस्यान्वयानुपपत्तेर्न
तदंगत्वंमंत्रस्य। न हीदं हविरजुषतावीवृधातमहोज्यायोकृतेतिमंत्रभागस्य पुरोडाशसेवयावृद्धोग्निः स्वस्मि
न्यजमानेतेजोबाहुल्यंकृतवानित्यर्थः प्रहरणे संभवति। भूतनिर्देशानुपपत्तेः प्रतिपत्तेर्देवतानपेक्षणा
च्चातः कात्यार्थः संबंधरूत्यभिप्रेत्य पूर्वपक्षमुपसंहरति। अत इति। प्रस्तरप्रहरणस्य बर्हिषि प्रस्तरसादनानंतरं सु
क्धारणकार्यार्थतया विधियुक्तप्रस्तरप्रतिपत्तिरूपतया विहितस्य स्रुग्धारणकार्यानिष्पत्तेरनिर्ज्ञातकालत्वंस्य

तिरेकेणासूचयितुमस्य निर्ज्ञातकालत्वोपपत्त्यर्थमनूयाजोत्तरमित्युक्तं। अत एवाह। तत्कालविशिष्टमिति। यद्यपि
४७ गमकत्वेपि तत्त्रीत्यायाः शक्तिस्तथापि प्रहरतिभावनायां यथाकारकाकांक्षा न तथा गमकायेक्षा। आकांक्षिता
47 न्वयसिद्ध्यर्थकरणत्वेनैव कॢप्तार्थस्यापि निरस्तिवचनस्यातिभार इति न्यायेनान्वयाश्रयणं युक्तं किमुतनत्रापि
शक्तिकल्पने प्रमाणाभावाद्धत्र सरणेवेति विनाकारणं न दाश्रयणं न युक्तमित्यभिप्रेत्य सिद्धांतमाह। प्रचुरेति।
यत्तु प्रहरणभावनायामन्वयायोग्यत्वमुक्तं तदनुपपन्नेत्यस्य पुरोडाशादिविषयत्वेप्यग्न्यादिः पुरोडाशादिसेवित
वानेतेन वह्निरग्निस्तेजो वाहुल्यं कृतवान। यत्तु यजमानआयुराधाशास्तेतदनेन प्रत्यक्षनिर्दिष्टेन प्रस्तरणमेरव्येन
हविषत्येवमग्निमेणेकवाक्यतयाथवा इदंशब्देन पुरोडाशोदेर्हृतस्य व्यपदेशानुपपत्त्या प्रत्यक्षनिर्दिष्टप्रस्तर
स्यैव परामर्शोपपत्तेरजुषतेति भूतनिर्देशस्याशंसायां भूतवच्चेत्यनुशासनात्सेवनं कुर्वित्यर्थे तयोयाद्यान संभ
वात् किंचित्करमित्यभिप्रेत्याह। अतश्चेति एवमुभयविधिलिंगसंभवे श्रुतिसहायस्य प्रावल्यं सूचयितुं श्रु
तेत्युक्तं। नच प्रहरणस्य प्रतिपत्तिरूपतया देवतानयेक्षणान्मंत्रवर्णिकदेवताकल्पनयापि तत्प्रकाशनासंभ ४७
वात्कथं मंत्रस्यांगत्वं संभवइत्यत आह। प्रहरतिरिति। मंत्रस्य क्रियातत्संवंधिप्रकाशनेनवाकरणत्वात्तदभा

वेमंत्रगतकरणत्वान्यथानुपपत्त्यानर्थस्यांगत्वं कल्पनस्यावश्यकत्वेन प्रकृतेपि श्रुतत्ववगतांगतानिर्वाहायमांत्रव
र्णिकदेवताकल्पनया द्रव्ये देवतासंबंधात्प्रहृत्तोदेवतोद्देशपूर्वकद्रव्यत्यागांशो व्यत्यागो ऽशस्याप्यजहत्स्वार्थलक्षणा
फलमुखत्वात्रविरुध्यतेइत्यर्थः।त्यागांशंप्रतिद्रव्यस्यकरणत्वात्त्वस्तरमितिद्वितीयानुपपत्तिंपरिहर्तुमाश्रयिकर्म
रूपेत्युक्तं।यथैवस्विष्टकृद्यागस्यप्रक्षेपांशेनोपयुक्तद्रव्यसंस्कारकत्वंत्यागांशेनादृष्टार्थत्वमेवमिहापित्यागांशेना
दृष्टार्थत्वेपिप्रक्षेपांशेनतत्प्रतिपत्तित्वात्ऽनुपपत्तिरित्यर्थः।अयंचात्रविशेषः।स्विष्टकृतिप्रतिपदार्थांतर्गतोद्देशांशस्या
नुपयुक्तापिस्विष्टकृद्देवताविषयत्वान्नदंशोप्याराद्रुपकारकत्वमेव।तदीयमंत्रांतर्गतोद्देशांशेनतुइष्टदेवता
स्मारकत्वेनसंस्कारकत्वं।प्रकृतेतुमंत्रांशेनेवत्यागांशांतर्गतोद्देशांशेनापीष्टानामेवदेवतात्वात्संस्कारकत्वमे
शे वेति।यथाचयजमानकर्तृकस्यागविशिष्टोद्देस्यनयाजिवाच्यत्वंसपितुमंत्रेणक्रियमाणस्यैवेतिन्यायसुधाका
रादीनांलिखनंतथातर्हुपणपुरःसरंयजमानकर्तृकस्यैवतस्यतद्वाच्यत्वंचतुर्थेव्यक्तीकरिष्यते।अत्रचसूक्तवा
कस्यकरणमंत्रत्वान्मंत्रांतेनकर्मादिःसंनिपात्यइतिवचनात्सूक्तवाकपाठानंतरमेकप्रस्तरद्रव्यकहोमानुष्ठा
नेऽर्थान्तरानंतर्यरूपकाललाभात्कालार्थतापिचप्रसंगाद्व विष्यतीत्यत्रभट्टपादानांमिश्राणां ते उक्तिरितिस्थि

तेयच्चायमुदाहृतोयाज्यावत्सूक्तवाकस्यापिहोमकालप्रयोज्यत्वेनाहुतात्यागत्वाहूयमानावस्थद्रव्यसंबंधलक्ष
५८ णागुणयोगाद्याज्यात्वेनस्तुतिर्युक्तेतिगंयेनप्रस्तरप्रहरणस्यसूक्तवाकपाठयोगपद्याभिधानंतद्युक्तमेव।आ
ग्नेयादियागेषुप्रत्येकंदेवतात्वेनान्वितानामिहापितथैवदेवतात्वांगीकारेणसमुच्चयेनज्योतिष्टोमवदाहृता
पत्तावपिअग्निरिदंहविरजुषतेत्यादितत्तद्देवतान्विपदोच्चारणेसत्येवतत्तद्देवतोद्देशेनद्रव्यत्यागानुष्ठानासं
58 भवेनयोगपद्यासंभवात्।नहितदवयवमात्रपाठेनात्वावयवपदपाठाभावेसमस्तसूक्तवाकजन्यप्रका
शनंसिध्यति।वस्तुतस्त्वग्न्यादिदेवताविधिकल्पनायांप्रत्येकमाग्नेयादिषुदेवतात्वेनान्वितानामप्यग्न्या
दीनांसमुच्चितानामेवलाघवाद्देवतात्वकल्पनस्ययुक्तत्वात्तावताप्यनंतरितत्तद्देवताप्रकाशनरूपप्रयोज
नसिद्धेर्नयुक्तंप्रत्येकंतत्कल्पनमितिपरप्रयुक्तप्रस्तराख्यद्रव्यांतरणानाक्षेपेणैकस्यैवप्रस्तरस्यतावद्देवतोद्दे
शेनमंत्रपाठानंतरंसकृत्यागेनांशतःप्रस्तरस्याहुतस्यदाहानुष्ठानंयाज्ञिकानामप्युपात्तमितिप्रकाशकारैरेव ५८
पराक्रांतत्वान्नेहविस्तरभयात्प्रपंच्यते।प्रकृतमनुसरामः।मंत्रत्वावदिति।एतेनयाज्ञिकाःप्रसिद्धेरवयव
योगाच्चहोतृप्रवचनविहितत्यज्यमानद्रव्यसंबंधोद्देशानांगभूतदेवताप्रकाशकमंत्रत्वरूपस्यसखंडस्य

याज्यात्वस्यैकचित्काध्वर्य्येवविहितमगारेऽपिदर्शपूर्णमासीययाज्यात्वव्यापकत्वात्तत्रचयाज्यापदप्रयोगस्यगौण
त्वकल्पनेप्रमाणाभावान्निरासः सूचितः। नचतत्रैवयाज्यापदप्रयोगात्तत्सिद्धिविषयत्वसंभवइत्यतआह। एव
कारोपबद्धत्वेनेति। एवकारस्याप्रसक्तयाज्यांतरनिषेधकत्वायोगात्सूक्तवाकएवयाज्यावत्प्रशस्तइत्यर्थप्रतीते
रौपचारिकयाज्यात्वकथनादस्यनिगदरूपत्वेनायाज्यात्वेनिगदाइत्यन्यत्रतेषांयाज्यात्वनिषेधाच्चविहित
वान याज्यात्वानुपपत्तिरतएवानंयजतीत्यादिमुख्ययाज्याधर्माणामिहाप्राप्तिरित्यर्थः। एवंचयदिलैंगिकंदेवताप्रका
शनार्थत्वमनपेक्ष्यश्रुत्यासूक्तवाकस्यप्रहरणांगता। श्रौतंचप्रहरणांगत्वमनपेक्ष्यलिंगेनदेवताप्रकाशनांगतावोध्ये
ततोविरोधाच्छ्रुत्यालिंगवाधश्रुतिविनियोज्यस्यकथमपिप्रहरणशक्त्याभावाच्छ्रुतेरेवविनियोजकत्वायोगा
दुभयानुग्रहायेष्टदेवताकीर्तनमात्रेणकृतार्थत्वंसूक्तवाकस्यांगीकृत्यकालार्थेप्रहरणेचयोभ्युपगम्येतानले
तदस्तिकिंतुश्रुत्यनुग्रहार्थेलिंगेनप्रहरणांगभूतदेवताकीर्तनद्वाराश्रुत्यवगतप्रहरणांगत्वापेक्षणात्सूक्तवा
कस्यचप्रहरणशक्तिसिद्धेश्रुत्यालिंगावगतदेवतांगत्वापेक्षणाच्छ्रुतिलिंगयोस्तुल्यार्थत्वेनविरोधपरिहा
रोपपत्तेर्नविरोधपरिहारायेष्टदेवताकीर्तनमात्रेणकृतार्थत्वमंगीकृत्यात्यत्रविनियोगानर्हत्वाकालार्थताभ्यु

पगं तत्रेत्यभिप्रेत्य सिद्धांतमुपसंहरति। अतश्चेति। प्रयोजनं पूर्वपक्षे प्रक्षेपमात्रानुष्ठानं। सिद्धांते त्विष्टादेवतोद्देशे
४९ न त्यागस्यापीत्यादि स्पष्टत्वान्नोक्तं। कृत्स्नोपदेशात्॥ पूर्वाधिकरणे श्रुतिलिंगाविरोधेनैंद्र्या वक्रूतिविनियो
ज्यत्वेपि मुख्यार्थे विनियोगस्य साधितस्येह केषांचित्पदानामसमवेतार्थत्वादसंभवेनाक्षिप्य समाधानादास
पि कीमनंतरसंगतिमुत्सर्गोधिकरणाप्रसक्तमुख्यार्थे विनियोगस्य स्थापनात्पादसंगतिं तथा पौर्णमास्याममा
49 वास्यायां च प्रहरणानुष्ठाने सति पौर्णमास्यामप्यमावास्यादेवतावाचिपदयुक्तस्य सर्वस्यैवममावास्यायाम
पि पौर्णमासीदेवतावाचीयदप्रयुक्तस्य सूक्तवाकस्य पाठ उत तत्कालीनप्रयोगे तत्तद्देवतावाचिपदानामप्र
योगेण पाठ इति संशय मत एव पूर्वोदाहृतराव विचाराद्विषयवाक्यं च स्पष्टत्वादनुक्त्वा पूर्वपक्षमेवाह। श्रुत्येति
। प्रबलप्रमाणेन प्रहरणांगत्वेनैव निराकांक्षस्य सूक्तवाकस्येष्टदेवताप्रकाशन विषये लिंगे श्रुतिकल्पनानुपप
त्तेर्ना विरोधेन देवताप्रकाशकत्वेपीष्टदेवताप्रकाशनांगत्वाये न तत्तद्देवताप्रकाशनरूपप्रयोजकाभावा ४९
त्तत्तद्देवतावाचिपदलोपेन कालव्यवस्थायामंत्रपाठः प्राप्नुयादित्यर्थः। अत एवोत्तमप्रयाजस्विष्टकृन्मंत्रयो
र्निष्कृष्य यथालिंगं प्रयोग सिद्धिरित्यसिद्धांतन्यायेनैव प्रसाधनीयत्वेन पि श्रुतिविरोधहेतुकपूर्वपक्षस्य

तत्रासंभवादनुदाहरणत्वमिति ध्येयं। वस्तुतस्तु विरोध एवास्तीत्याहानचेति। प्रहरणमेव त्विति। विनियोजकप्रमा
णद्वयसत्वे प्रबलप्रमाणप्रमितस्यैव शेषिणः प्रयोजकत्वकत्वकल्पनौचित्यं तु शब्देन सूचितं। ततश्चापुरादिवदि
ष्टदेवताप्रकाशनस्यानुषंगिकत्वेपि प्रहरणस्येष्टानिष्टदेवतापदसाधारणपेन सूक्तवाकं प्रति प्रयोजकत्वात्तत्सत्ते
संपूर्णसूक्तवाकपाठो विकल्प इत्यर्थः। पदनेन हविषेति मंत्रे प्रत्यक्षनिर्दिष्टस्य प्रस्तरहविष आयुरादिफलस्य च निर्दे
शेनैकदेशपाठस्य साकांक्षत्वेनायुक्तत्वाच्च तदंशे होमस्य प्रयोजकत्वेपीष्टदेवताप्रकाशनस्यापि मंत्रलिंगाधी
नत्वात्तं नित्यत्वोपकारकत्वकल्पनामुलत्वाद्धि भज्य विनियोगांशमात्रे प्रयोजकत्वमात्रं कल्प्यते। ननु होमाभा
वेपि सूक्तवाकपाठविषयेइत्यभिप्रेत्याह। अत एवापूर्वेऽवभृथे प्रहरणाभावे आज्यभागाद्यंगे ष्टदेवताप्रकाश
नार्थं तया न सूक्तवाकपाठ इति भावः। एतेन परमार्थतस्तु प्रहरणांगत्वोपदेशात्क्रियमाणप्रस्तरप्रकाशनप्रा
धान्यावगतेर्नोर्थतोपि वाक्यभेद इति न्यायसुधोक्तौ तथा सति प्रस्तरप्रकाशनतात्पर्यकत्वेन प्रहरणप्रयुक्तत्वा
पत्तेस्तस्य च सूक्तवाकशब्देन पुरोडाशकपालपद्देवताप्रकाशनतात्पर्यकत्वेन तत्प्रयुक्तस्येव सतो विनियो
गेन सिद्धांतेऽनिष्टत्वादिति प्रकाशकारैर्दूषणमापाद्येदमापुक्त प्रस्तरजोषणकर्तृतया प्राधान्येन सकलप्रयो

अतएवेति।५

५० गसमवेतेष्टदेवताप्रकाशने एव तात्पर्यं तद्विघाते नैव प्रहरणे विनियोगाद्देवताकल्पकत्वमित्युक्तं तत्रास्तां।
तुषोपवापानुष्ठानात्कालांतरीणकपालोपादानप्रयोजकत्वस्य पुरोडाशवद्वेहापि तदपनिवारणायेष्टदेवता
प्रकाशनप्रयुक्तस्यापि सूक्तवाकस्य प्रहरणप्रयोजकत्वावश्यकतया प्रहरणसंबंधिद्रव्यप्रकाशकत्वेन प्रह
रणप्रयोजकत्वस्याकामेनापत्तेः। अन्यथा यथाशक्तिप्रयोगे प्रस्तरहोमाभावेप्यनूयाजोत्तरमिष्टदेवताप्र
काशनानुरोधेन सूक्तवाकपाठापत्तेरतो यथैव दर्शपूर्णमासप्रयुक्तस्यापि भेदनेहोमस्य भेदनप्रयोज
कत्वात्रैकतरेण विना तदनुष्ठानमेव प्रहरणप्रयुक्तसूक्तवाकांतर्गतकतिपयपदजन्येष्टदेवताप्रकाशनस्यै
व प्रयोजकत्वमादाय सूक्तवाकशब्दनिर्देश्यत्वोपपत्तेः प्रहरणस्यापि चेष्टदेवताप्रकाशनप्रयुक्ते एव प्र
योजकत्वमित्यंगीकारादन्योन्यनियमसिद्धिः। पुरोडाशकपाले तु तुषोपवापकालीनपुरोडाशोपादानप्रयुक्तत्व
संभवात्पुरोडाशकपालपदे सिद्धवन्निर्देशप्रतीतेस्तुषोपवापं विनापि प्रयुक्तसिद्धत्वसिद्धिरिति वैषम्यं। अत ए ५०
व पदंशे प्रयोजकत्वमन्यतः सिध्यति न तदंशेऽन्यतरस्यापि प्रयोजकत्वं कल्प्यते गौरवादतो विभज्य विनियोगां
शे इष्टदेवताप्रकाशनस्य प्रयोजकत्वमनुष्ठानांशे प्रहरणस्येति न कोपि विरोधः। एवं स्थिते अतश्चेष्टदे

वताप्रकाशनोपजीवित्वाद् प्रयोजकं प्रयोजं प्रहरणमिति वार्त्तिकमपि इष्टदेवताप्रकाशनोपजीवित्वादिति हेतूपादा
नाद्धि अजपविनियोगांशे एवमप्रयोजकत्वाभावाभिप्रायेण व्याख्येयं। नहि सूक्तवाकशब्दात्प्रतीयमानमिष्टदेवताप्र
काशनमप्रयुक्तत्वमयन्होतुं शक्यं श्रुत्यैव पूर्वोक्तरीत्यानुमतत्वादित्याशयः। अत्र च प्रकरणविभागादुभे प्रतिकृत्स्नश
ब्द इति सूत्रस्वारस्येन सूक्तवाकपदस्य रूढ्यभ्युपगमेन प्रयोगद्वयवर्त्ति प्रहरणद्वयोद्देशेन कृत्स्नसूक्तवाकवि
धानेप्येकैकप्रहरणेऽवयवशः प्रयोगसिद्धिरिति श्रुतिविरोधपरिहारमाशंक्य यज्यादिपदेलक्षणापत्तेः स
मुदायस्य फलसाधनत्वायोगात्समुदायिनामेव फलं प्रत्युपादेयतया विवक्षितसाहित्यानां साधनत्वेपीति क
र्त्तव्यतांशे उद्देश्यत्वेनाविवक्षितसाहित्यानामन्वयात्प्रत्येकमेवेति कर्त्तव्यतया प्रयाजादीनामिव प्रहरणस्यान्वये
सूक्तवाकस्यापि तदंगस्य प्रत्येकमेवान्वयप्राप्तौ कालैक्यात्त्रयाणामर्थं प्रहरणं तंत्रतया तंत्रेणोवानुष्ठानप्राप्तेन
वयवशः प्रयोगासिद्धेरिति भाष्यकारेण प्रकृष्टदेवतायदानां परस्परान्वयाभावेनैकार्थप्रतिपादकत्वासंभवान्ने
कः सूक्तवाकोपित्वभित्तस्तत्र पदाये ता एकैकदेवतापदभिन्नाः बहवः सूक्तवाकाः। अतश्च विभक्तस्यैव सूक्त
वाकस्य तत्तीप्रहरणांगत्वाप्राप्तिपदिकत्तनीया श्रुतेरविरोधे सति एकवचनस्य सूक्तवाकसामान्याभिप्रा

येगोपपत्तिरितियस्मिन्कालेयावदपेक्षितदेवतावाचिपदयुक्तस्यैवसूक्तवाकत्वात्तावन्मात्रेणप्रहरणानुष्ठानेवै
५१ गुण्यापापसक्तेरिष्टदेवताप्रकाशनरूपलैङ्गिककार्यानुरोधेनैकप्रहरणप्रयोगेतंत्रपदानांसकृत्पाठेपिसूक्तवाक
त्रयपाठोपपत्तिरितिकृतंविरोधपरिहारंवार्त्तिककारोऽदूदुषत्।यद्यपिप्रत्येकपदानांनैकार्थाभिधायकत्वेनतथा
पिपदैर्नेहविषाश्चआशास्तइत्येकवाक्यतयैकप्रयोजनकत्वेनैकार्थत्वं।तत्रचेष्टदेवताप्रकाशनस्यैवप्रयोज
51 कत्वादर्थतःप्राधान्यंतथापिपूर्वोक्तरीत्याप्रहरणस्याप्यङ्गित्वेनशब्दतोर्थतश्चप्राधान्यसत्त्वादेकप्रयोजनत्वो
पपत्तिः।यद्यपिचतत्तद्देवताप्रकाशनानामेवशब्दतःप्राधान्यमङ्गीकृत्यनानावाक्यत्वमिष्यतेनततोपातेअग्नेरित्या
दिवदभितस्तत्रपदानामप्यनुषङ्गेणएयकृपाठोपपत्तिः।सूक्तवाकेनेत्येकवचनबलाद्नियमेनैकस्यैवसूक्तवाक
स्यकृत्वाविनियोगापत्तेस्तदंशेणैवसंनिपत्योपकारकत्वलोभार्थमिष्टदेवताप्रकाशनार्थत्वोपपत्तेःसूक्तवाक ५१
त्रयपाठेप्रमाणाभावाघावत्प्रधानत्रयदेवताकत्वानुपपत्तिश्च।अतोवैश्वानरवाक्यवदुपक्रमोपसंहारैक्ये
नैकवाक्यत्वात्नानावाक्यत्वेनसूक्तवाकबहुत्वासिद्धेसतिसमुदायएवसूक्तवाकत्वात्प्रातिपदिकश्रुतिवि
रोधोऽवयवशःप्रयोगेदुर्निवारइतिएवंचविंदोचसमुदायेचतोपशब्दोपपद्यते।संसर्गिद्रव्यरूपत्वात्सूक्त

वाकपदे तथेति वार्तिकतात्पर्यमनुसंधाय श्रुतिविरोधे परिहरन्ति सूक्तवाकपदस्येति । उक्तमिति । आज्यभागादिष्टदे
वतामित्यर्थः । एतेन धेंद्राग्नी जुहोतीतिवदग्निसंबोध्यत्वं सूक्तवागसीत्यभिधानात्सूक्तवाकपदघटितत्वेन सूक्त
वाकत्वस्य मंत्रे संभवेपीह मंत्रांतर्गतपदप्रकाश्यार्थमादाय योगस्यांतरंगतया संभवतस्त्यागेन पदघटितयोगस्य बहि
रंगस्याश्रयणं न युक्तमिति सूचितं । अतश्चेष्टदेवताप्रकाशनरूपकार्यानुरोधेनेष्टदेवतानपेक्षिता निष्टदेवतापदो
च्चरणेऽजुषतेत्युद्दिष्टरूपोक्तवचनस्यानंततया दुरुक्तवाक्यत्वापत्तिरित्यर्थः । तिनेति । यथा । आशास्तेयं यजमा
नोसावित्यादेः सर्वनामनिर्देशादुराम्नाततत्तद्देवदत्तादिनामपूरितस्य मंत्रस्य यथायुक्तिसहितपाठेन कात्स्न्येनाव
धारणात् तथेहापि युक्तिसहितपाठेन कृत्स्नसूक्तवाकावधारणायाता वानेकसूक्तवाकः पठनीय इत्यर्थः । तदुक्तं वा
र्तिके तेन त्रिधैव मंतव्यः सूक्तवाकः प्रतिष्ठितः । स्वाध्यायेकर्मकाले प्रकृतौ विकृतावपि । सर्वप्राकृतदेवत्यः स्वाध्या
ये तावदिष्यते । निष्कृष्टदेवतामध्याः । प्रकृतौ समुदाययोः । सूर्यादिपदमध्यस्थविकृताववधार्यते इति । योग
बाधादिति । अध्ययनादिकाले दृष्टत्वाभविनफलोपहितेष्टदेवताप्रकाशकमंत्रत्वाभावेन योगबाधा
त्तदर्थे स्वरूपयोग्यतामात्रेणाशक्त्यंगीकारे चानिष्टदेवताप्रकाशकपदानामपि योग्यतामात्रेण प्रयोगोपपत्तेरथ

यनादिकालेसर्वेसूक्तवाके एवतत्प्रसिद्धेरूहिकल्पनमावश्यकमित्याशंकार्थः। अश्वकर्णादाविति। अश्वकर्णा
५२ दिशब्दे इत्यर्थः। तस्मात् श्रुतिविरोधाभावादुपजीव्यत्वेनमुख्यसामर्थ्यस्यापियुक्तंविनियोजकत्वमभिप्रेत्यप्रयोज
नमाह। प्रयोजनमिति। तत्तत्कालीनप्रधानांगतयाप्रहरणानुष्ठानेतत्कालीनप्रधानसंबंधिदेवतावाचकपद
युक्तः। सूक्तवाकस्तद्भिन्नकालीनप्रधानसंबंधिदेवतावाचिपदोद्धारेणपठनीय इत्यर्थः। सिद्धांतप्रयोज
52 नोक्त्यापूर्वपक्षेव्यतिरेकेणपौर्णमास्यामावास्यायांवाकृत्स्नस्यप्रयोगइतिप्रयोजनमर्थात्सूचितं। यत्तुप्रकाश
कारैः पूर्वपक्षेसूक्तवाकस्यप्रहरणप्रयुक्तत्वात्प्रस्तरस्यनाशदोषापहारेषुप्रयोगः। सिद्धांतेतुइष्टदेवताप्रका
शनप्रयुक्तत्वात्तत्प्रयोगइतिप्रयोजनांतरमुक्तं तत्प्रस्तरनाशादिषाज्येतहोमानुष्ठानस्य सिद्धांतेइव पूर्वपक्षेपि
तुल्यत्वेनप्रयोजकहोमसत्त्वात्प्रयोगोपपत्तेः। प्रस्तरहोमाभावे एव भवेदिष्टदेवताप्रकाशममात्रानुरोधेन
तदनुष्ठानस्यसिद्धांतेप्यदर्शनादयुक्तमिति कौस्तुभेत्रापिचहोमाभावेपीष्टदेवताप्रकाशनस्यसूक्तवा ५२
कपाठविषयेप्रयोजकत्वेनिरासोपपादनव्याजेनैवसूचितं॥ ॥लिंग॥ ॥काम्येष्टय इति। ऐंद्राग्नमेका
दशकपालंनिर्वपेद्यस्यसजातीवापुः ऐंद्राग्नमेकादशकपालंनिर्वपेद्भ्रातृव्यवान्। अग्नयेवैश्वानरायपद्वाद

शकपालं निर्वपेदुक्त्वामइत्यादिवाक्यविहिताइत्यर्थः सजातास्तयोर्विप्रतिपन्ना भवेयुरित्तिवीयुरित्यस्यार्थः।तल्लिं
गं।नहि लिंगाएवेति।यदेवेष्विषु चिह्नमैन्द्राग्नादिदेवताशब्दस्तदेव चिह्नं येषु तादृशा इत्यर्थः याज्यानुवाक्यामंत्रा इति।
इंद्राग्नी रोचना दिवे त्यादय इत्यर्थः।वक्ष्यमाणनियतत्वव्यवस्थोपपादकतयाक्रमसमाख्याशब्दयोरुपादानं।तत्र
लिंगविनियोगविचारात्पाठाध्यायसंगती पूर्वत्रश्रुतेर्लिंगसापेक्षत्वेउक्ते प्रसंगादिह लिंगस्याप्यन्यप्रमाण
सापेक्षत्वप्रतिपादनात्प्रासंगिकीमनंतरसंगतिस्तथा किमेतानि लिंगादैंद्राग्नदेवत्यनित्यकाम्यकर्ममात्रांगमुत
पूर्वोक्तकाम्येष्टिमात्रांगं क्रमसमाख्याभ्यामिति संशये च स्पष्टत्वादनुक्त्वा पूर्वपक्षमाह।नपिति।स्वाध्यायविध्यधा
पितस्य मंत्रजातस्य प्रयोजनाकांक्षासहकृतेन योग्यत्वारूपेण लिंगेन मंत्रस्यैंद्राग्नीप्रकाशनार्थत्वोपपत्तेर्न लिं
क्षाये गस्य सामान्यसंबंधबोधकप्रमाणापेक्षं क्रमसमाख्याभ्यां नियतत्वव्यवस्थासिध्येन्न हि लिंगं सामान्यतः श्रौ क्रतुसं
बंधेऽवगते एव द्वारविशेषविशेषे विनियोजकमित्यत्र किंचिन्नियामकमस्ति श्रुतिवदेव पूर्वं क्रतुसंबंधान
वगमे प्याकांक्षासहकृतलिंगमात्रेण विनियोगोपपत्तेरित्यर्थः।देवतात्वस्य यागैकनिरूपितत्वाद्विहितत्वघ
टितत्वेनालौकिकत्वादव्यभिचरित क्रतुसंबंधमुपपादयति।इंद्राग्न्यादीति।देवतात्वस्यालौकिकत्वेनैतेन रूपेण

मंत्रेऽप्रकाशनादधिष्ठानमात्रस्यैवं दृष्याद्देर्मैत्रार्थवादादेर्विनास्वर्गमेवोद्दिस्यत्वेन प्रतिपादनाल्लौकिकत्वावग
५३ तेर्नाव्यभिचारित्वमित्यादिभिप्रेत्याहाव्यभिचारित्वेपिवेतिमंत्रार्थवादादेरन्यपरत्वेनैं द्वारीनास्वर्गादिस्यत्वेश्रमाणाभा
वोपिवेत्यनेनसूचितः।परिशेषादेवेति।इंद्रादिपदान्तहिते नकृत्वाव्यभिचारित्वेनैवदेवतात्वप्रतीतेः स्मारकविध
कृतूपस्थित्यापूर्वसाधिनत्वोपस्थितिरित्यर्थः।एवमपूर्वसाधनत्वोपस्थित्यर्थेसामान्यसंबंधबोधकप्रमाणसा
पेक्षत्वंलिंगेप्राचिनोपपादितव्यर्थंसूचयित्वामंत्राणामाकांक्षोत्थापकत्वेननदपेक्षास्वयंदर्शयन्सिद्धांतमाह।
आकांक्षाभावेइति।विहनयोग्यस्यापिपुंसोनैराकांक्ष्येसतिविहनेविनियोगादर्शनायोग्यतामात्रस्याकांक्षाभावे
विनियोजकत्वानुपपत्तिरित्यर्थः।वाचस्तोमपदं ब्रह्मयज्ञादेरप्युपलक्षणंवाक्यप्रकरणादिनेति।तत्रवषट्कारा
दिमंत्राणामेषवैसप्तदशइतिवाक्यंलवनमंत्राणांप्रकरणं।प्रकृतेक्रमसमाख्योभयंपूषानुमंत्रणादौसमा
ख्यामात्रमितिविवेकः।इदमेवसामान्यसंबंधबोधकप्रमाणसापेक्षत्वंलिंगस्यश्रुतेस्तुस्वतएवतदुत्थापक
त्वात्तदनपेक्षेत्यर्थः।मंत्रविशेषेति।सामान्यविशेषभावन्यायेनापिविपरीतबाधकतासूचनापविशेषपदा ५३
नं।दुर्बलेनेति।आकांक्षोत्थापनेनेमिशेषः।उत्कृष्टस्यापीति।समाख्यासहकृतमुख्यलिंगेनेतिपूर्वशेषः।

प्रमाणद्वयेति। वाचस्तोमविनियोजकवाक्यस्य मन्त्रप्रयोजनाकांक्षावेलायामनुपस्थितत्वेन वा बाध एव। ननु तेन दुर्बल
योरपि बाधः। इह तदानीमेवोपस्थितिप्रमाणद्वयसमावेशे प्रबले न दुर्बलस्य बाध एवेति न तदाकांक्षोत्थापकत्व
संभव इति विशेष इति भावः। न चान्यत्रेति। क्रमप्राप्तकाम्येष्टिव्यतिरिक्तकर्मणीत्यर्थः। प्रमाणाभावादिति। प्रकरणाप
गतो प्रकरणायत्तेन भयाकथमस्योपकर्तव्यमित्यपेक्षोत्थानं तावदव्यभिचरितक्रतुसंबन्धस्य व्याप्तिरूपतया तस्या
नैयत्यबोधकत्वेऽप्याकांक्षोत्थापकत्वे प्रमाणाभावः। न हि वह्निविषये निराकांक्षस्य वह्न्यनुमितौ जातायां तद्विषये व्या
प्तिमात्रेणाकांक्षोपजायते। अतो मतस्याकांक्षोत्थापकत्वसंभव इत्यर्थः। अव्यभिचरितक्रतुसंबन्धस्वरूपस्यान्यथानु
पपादत्वाद् पूर्वमात्रनिरूपितसाधनतावच्छेदकीभूतधर्मावच्छिन्नस्यापूर्वाव्यभिचारित्वरूपतयैवावश्यनिर्वच
नीयस्यापीहासंभव इत्याह। वस्तुतस्त्विति। स्वार्थप्रतिपादनं प्रत्यपीति तस्येतं प्रत्यकारणत्वेऽर्थप्रतिपादकत्वाभा
वेन प्रीतियदिकसंज्ञानुपपत्तिर्जुहूशब्दस्य तत्र कारणत्वेऽपि क्रतुप्रत्याकारविशेषविशिष्टार्थस्यैव नियमेन कारणत्व
मिति वैषम्यं। अत एवात्रार्थस्यापूर्वसाधनत्वकल्पने प्रमाणाभावान्न तद्द्वारापि पदस्यापूर्वाव्यभिचार इत्यर्थः। स्वा
रसिकीति। स्वत एव साकांक्षस्य नाकांक्षोत्थापकप्रमाणापेक्षेत्यर्थः। उपनिषदिति। अत्रेत्र चाविनाशी वा अरे

यमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीत्युपनिषज्जन्यमात्राशब्दवाच्यधर्मो धर्मविकारशरीरसंबंधरहितसं
५४ सारिकं तं भोक्तृ नित्यात्मज्ञानमेकं तथा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः स
त्यसंकल्प इत्याद्युपनिषत्कृतपापादिदोषरहितत्वकाम्यमानफलप्राप्तिप्रयत्नानपेक्षसंकल्पमात्राधीनसिद्धि
रूपगुणविशिष्टात्मप्रतिपादनपूर्विकया सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुत्या विहितं वेदांतवाक्यावधा
रणात्मकजिज्ञासोपेतं तद्ध्वाघारितात्मरूपार्थानुचिंतनाख्यं चैषणात्मकमपहतपाप्मत्वादिगुणविशिष्टात्म
ज्ञानं द्वितीयं । तथात्मानमुपासीतेत्यादिविधिविहितं निर्गुणात्मविषयमपरोक्षसाक्षात्कारपर्यंतमात्मज्ञानं तृतीय
मिति यद्यप्यात्मज्ञानं तृतीयमिति यद्यप्यात्मज्ञानं तृतीयमिति यद्यप्यात्मज्ञानं त्रिविधं तथापि द्वितीयतृतीययोरु
पासनारूपात्मज्ञानयोः कर्मणि पुरुषे वा दृष्टप्रयोजनानां वादृष्टापेक्षायां श्रुत्याद्यभावेन क्रत्वर्थत्वानुपपत्तेः
स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानाप्नोति सर्वांश्च तरति शोकमात्मविदित्यादिवाक्यशेषसमर्पितं द्वितीयात्मज्ञा ५४
नस्य फलं । तथा स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तते इत्यादिवाक्यशेषसमर्पितं फ
लं तृतीयात्मज्ञानस्येति व्याकरणाधिकरणे आचार्यैः पुरुषार्थत्वस्य प्रतिपादनादिह प्रथममेवात्मज्ञानं गतार्थं न तस्य क्र

त्वंगत्वं केवललिंगादेवयघप्याज्ञापिवाक्यशेषसमर्पितंफलं संभाव्यतेतथापितस्यपरोक्षमपीन्यायेनार्थवादत्वात्क्रत्वंगत्व
मेवेत्यर्थः विनियोगइति। नचार्थज्ञानस्यसाक्षात्कर्मसुसामर्थ्यादव्यभिचारिद्वारानपेक्षणाल्लिंगमात्रेणकर्मणिविनियोगसं
भवेप्यात्मज्ञानस्यसाक्षात्कर्मविषयत्वाभावेनतत्रासामर्थ्यात्तद्येयात्मरूपस्यद्वारस्यलोकवेदसाधारण्येनक्रत्वव्यभिचा
राभावात्कथंतन्मात्रेणाक्रत्वंगत्वमितिवाच्यं। लौकिककर्मप्रवृत्तेर्देहादिव्यतिरिक्तात्मज्ञानंविनापिसिद्धत्वाद्धारत्वेऽव्यभि त्ति
चरितद्वारानपेक्षणात्पारलौकिकफलसाधनकर्मणामेवाकांक्षितत्वेनतत्रैवसामर्थ्यमात्रेणतदुपपत्तेरित्यर्थः विस्तरे
णचैतद्विश्वजिदधिकरणेचतुर्थउपपादयिष्यते अत्रचयथानुष्ठेयकर्मानुष्ठानोपयिकत्वेनात्मज्ञानस्यकर्मांगत्वंन
तत्वंनतथानिषिद्धकर्मांगत्वं। तथात्वेऽनात्मज्ञानवताकृतब्रह्महननादेः प्रत्यवायजनकत्वानापत्तेः किंतुतत्फली
भूतनिवृत्त्यंगत्वमेव। तदुक्तंवार्त्तिके। आत्मज्ञानंहिपृथक्त्वाक्रत्वर्थपुरुषार्थत्वेनज्ञापते। तेनविनापरलोकफलेषुक
र्मस्वप्रवृत्तिनिवृत्त्यसंभवादिति। एतावांस्तुविशेषः निषेधपरिपालनरूपनिवृत्तेरपूर्वजनकत्वाभावेनतत्रोपनि
षन्नियमजन्यापूर्वानुपयोगान्नित्यत्वादिप्रकारकात्मज्ञानस्यनिवृत्तौस्वरूपोपयोगितयैवोपयोगोउपनिषन्नियमस्तु
नपेक्ष्यते। विहितकर्मसुतुसोपीतितेयं। अथवायथानिषेधाध्ययननियमोनिषेधेष्वनुपयुज्यमानोपिनिमि

निश्चयद्वारा प्रायश्चित्ते स्वपर्युदयुज्यते तथोक्तात्मज्ञाननियमो निषेधेष्वनुपयुक्तोऽपि प्रायश्चित्ताधिकारहेतुभूतामनुता
५५ पहेतुकां निवृत्तिं संपादयन्प्रायश्चित्तेषूपयुज्यत इति द्रष्टव्यं ॥ तच्च सामान्यसंबंधबोधकप्रमाणं विना क्वापि लिंगमा
त्रस्य विनियोजकत्वायोगाद्देवविषयाकरोति श्रद्धयोपनिषदानदेवचार्यवत्तरं भवतीति श्रीमित्युद्गीथमुपासीतेति
तुद्गाथोपासना प्रकरणोपच्छांदोग्ये पठिताभ्यामपि वाक्याभ्यामेव प्रकरणबाधेन तयोः कर्तृत्वं गत्वंन लिंगमात्रेणेति न्या
यसुधाकृतोऽभिमतमपि प्रकरणबाधेनेतद्वाक्याभ्यां सर्वकर्तृत्वा त्वायोगादयुक्तमिति पार्थसारथ्यभिसंहितदूष
णामभिप्रेत्योक्तं । न्यायसुधाकृन्मतोपन्यासपूर्वकं तद्दूषणोपन्यासे च प्रकाशकारैरेव परास्तमिति नेह तन्मन
न्यते। परमार्थतस्तु वस्तुकृष्यादिवन्नित्यप्राप्तस्य विधिकल्पने प्रमाणाभावेन विधेयत्वानुपपत्तेर्जन्यतामात्रबोधे
प्यंगत्वासंभवादंगताबोधकत्वेन पदेवेत्येतद्वाक्यद्वयमेव स्वीकर्तव्यमिति कौस्तुभे स्तं पूज्यपादोक्तमनुसंधी
यते तदाकरोतीत्यस्य लेट्त्वं प्रकल्प्य कथंचिन्न्यायसुधोक्तमेव साध्विति ज्ञेयं । समाख्या वै प्यर्थ्यमिति । याज्यानु ५५
वाक्याकांडमिति समाख्यो वैयर्थ्ये सूत्रे च तद्द्युपादासंव्यर्थमित्यर्थः । साम दृश्यवदिति । सामिधेन्यंगभूतसामद
र्शपयस्मिकर्मण्यग्निदेवत्ये पाथिकृतीये विरूपेरूपे ऽग्ना तिदृष्टिकमंत्रप्राप्त्या प्रधानेया ज्यापेक्षा । वाचे निकसा

न

मदर्श्यपाम्नानात्सामिधेनीष्वाग्नेयगोर्ह्यापेक्षात्तत्र तत्त्रद्विष्टिक्रमाम्नातान्येयमंत्रद्वयस्यप्रथमातिक्रमेकारणाभावेनचसामि
धेनीषुक्रमाविरोधेननिवेशप्रसामिधेनीषुक्रमाविरोधेननिवेशप्रसक्तौयाज्याकार्येतन्निवेशस्यसमाख्ययैवबक्तव्यत्वात्त
दावश्यकत्वमित्यर्थः।अनेनैवैतादृशस्यलेऽपेक्षितविधानरूपन्यायस्यैवसमाख्ययावाधोनतुक्रमस्यकश्चनपिसं
कोचइतिसामिधेनीष्वन्ययोरागमाह।सामिधेनीष्विति।एवंतर्हिकाम्ययाज्यानुवाक्याकांडमितिसमाख्ययैवेष्टसिद्धेःक्र
मोपन्यासवैयर्थ्यमाशंक्यपरिहरन्ति।नचैवमिति।यत्रेति।अग्निवारुणीष्टिक्रमेतद्देवत्ययाज्यानुवाक्येपठित्वासोमा
रौद्रीष्टिक्रमाम्नानतद्देवत्ययाज्यानुवाक्यापाठात्पूर्वमाग्नेय्योक्तचःमधुयाजवत्पश्चसमाम्नातास्तत्रतासांलिंग
विनियुक्तंमंत्रान्तरेणावाधादुत्तरेष्टियाज्याकार्येसमाख्यामात्रेणविनियोगानुपपत्तेलिंगसहकृतसमाख्ययात्यत्रवि
नियोगप्रसक्तौक्रमेणतांवाधित्वोत्तरेष्टिसामिधेनीनिवेशलाभायक्रमोपादानमित्यर्थः।नचक्रमःपूर्वस्यामपीष्टौ
साधारणइत्यतआह।तत्सामिधेनीति।पूर्वेष्टिसामिधेनीस्थानस्यतदीययाज्यादिपाठेनव्यवधानादुत्तरेष्टिसामि
धेनीस्थानेएवपठितत्वमित्यर्थः।सिद्धान्तमुपसंहरन्ति।अतइति।प्रयोजनंपूर्वोत्तरपक्षप्रतिपादनेनतथामनोमायांतु
वचनादविकारइतिदशमिकाधिकरणपूर्वोत्तरपक्षप्रयोजनेनचस्पष्टत्वान्नोक्तं।अधिकारोज्योतिष्टोमइति।सामा

न ४

न्यसंबंधबोधकप्रमाणसूचनाय ज्योतिष्टोमे इतिसूक्तं। आग्नेय्येति। आग्नेय्याऋचा आग्नीध्रमंडपमुपतिष्ठत इति वचनस्या
५६ र्थः। एतच्चैंद्र्या सदो वैश्व देव्या हविर्धानमिति वाक्यद्वयस्याप्युपलक्षणं। अत्र यद्यपि श्रुतेर्विनियोजकत्वं तथापि लिंगो
न सामान्यसंबंधकारि प्रमाणसापेक्षत्वेन विनियोगे पूर्वाधिकरणे चिंतिते तेन प्रसंगादुपस्थितायाः श्रुतेरपि तदपेक्ष
त्वेन विनियोजकत्वाभिधानात् प्रसंगिकोपादसंगतिमत एवं तथैवानंतरसंगतिं च स्पष्टत्वादनुल्लिख्याप्रकृतमात्र
ग्रहणे कोटिं कैश्चिदुक्तमेरणोक्तां निरसितुमवश्यवक्तव्यसंशयं दर्शयति। किमिति। अप्रकृतमात्रग्रहणापेक्षाहि प्र
कृतानां पातपामत्वाद्धि नियुक्तविनियोगायोगाद्धुग्रहणासंभवेत्। नचतदुभयमत्रास्ति कुशादर्व्यादय इति वचनेना
दोषत्वस्मरणात् पुरोडाशकपालवद्धि नियुक्तविनियोगस्यापि संभवाच्च। अतोऽप्रकृतमात्रग्रहणपक्षस्यापु
क्तत्वं प्रकृताप्रकृतसाधारणोक्त्या सूचितं। ता एवेति। यद्यप्याग्नेय्या उपादेयत्वात् तद्गतैकत्वविवक्षया नवक्तीनां
करणत्वप्रसक्तिस्तथापि प्रकृताग्नेयीवदुक्त्वमादाय अथवैंद्रीवैश्वदेवीत्र्यंगं तत्पराभिप्रायेण वा ता इति बहुवचनं ने
यं। तथा च याः प्रकरणे पठिता विशिष्य स्तोत्रांतरे विनियुक्ताः अप्यत आया हि वीतये इत्यादयस्ता एवेत्यर्थः। पूर्वपक्षो ५६
पपत्तिमाह। आग्नेयीपदस्येति। तनीयायाः प्रकृतग्रहणेऽविरोधेपि प्रातिपदिकश्रुतेरविशेषप्रवृत्तायाः संकोच

56

रूपवाधापत्तिस्वचनायाग्नेयीपदस्येत्युक्तं। आग्नेय्याकरिष्यमाणोद्देश्यत्वाशंकानिरासोयोद्दलानायाप्राप्तोयस्यानविधि
सूचनायचविशिष्टविध्यन्यथानुपपत्तिप्रसूतविशेषणाविधिविधेयनोक्त्योपादेयत्वंसूचितं।तद्धितांतत्वाद्देति।।आग्ने
यीशब्दस्यतद्धितांतत्वात्तस्यचसर्वनामार्थवृत्तित्वेनसंनिहितव्यक्तिवाचित्वात्प्रकृतग्रहणमित्यर्थः।अत्रन्यायसुधा
कारादिभिरग्निदेवत्यत्वरूपकृत्वसंनिहितत्वादीनांमंत्रविशेषोपलक्षणत्वादेकेनचोपलक्षणेनप्रकृतकार्यसिद्धानु
पलक्षणांतरानपेक्षणादग्निदेवत्यत्वरूपकृत्वयोः कृतत्वाविशेषेणोभयोरप्युपलक्षणत्वेपिक्विग्ग्रहवाक्यस्यसर्व
नामगम्यत्वेनविलंवितप्रतीतिकत्वाद्विवक्षावगतेः सर्वग्रहणमितिसमाहितं तत्तत्संनिहितत्वोपलक्षितव्यक्तिवि
शेषत्वस्यापिगुणाधिकरणोतद्धितवाच्यत्वप्रसाधनादकृत्वेपिसन्नित्वानुमेयतयाविलंवितप्रतीतिकत्वस्यतुल्यतया
संनिहितत्वस्योपलक्षणत्वोपपत्तेरितिकौस्तुभदर्शितरीत्याऽयुक्तंमत्वातदंगीकृत्यपिपरिहरति।नद्धितस्येति।पूर्वोक्त
न्यायसुधाकृदभिहितसमाधिदूषणांतरद्योतित्वेपीत्यपिनासूचितांपथेति।अत्रचसर्वनामश्रवणाभावाद्धाह्मोदनिका
ग्निसंस्कारकहोमशेषोदनप्रतिपत्त्यर्थनयात्रात्विकंस्कारार्थत्वाभावेनतत्राशेपुनर्भोजनानुष्ठानादर्शनेनचतेषां
मुद्देश्यत्वानुपपत्त्याप्रकृतग्रहणेप्रमाणाभावइत्यर्थः।नचैवंप्रकृतग्रहणेनियामकांतराभावेप्यप्रकृतग्रहणेतस्या

आग्नीध्रोपस्थानस्य स्वरूपार्थत्वे ऽऽनर्थक्यापत्तेरपूर्वार्थत्वकल्पनस्यापि प्रावश्यकत्वात् कृत्स्नापूर्वार्थतायाः प्रकृतायाएवा
५७ ग्नीध्रोपस्थापनरूपद्वारांतरसंबंधमात्रकरणेन लाघवात्तदुपजीविविधिकल्पनत्वाच्च प्रातिपदिकश्रुतेरपि संकोचोपप
त्तेः प्रकृतग्रहणोपपत्तेरित्यभिप्रेत्य शंकते। नचेति। प्रकरणेन स्वतंत्रवाक्यांतरकल्पनया प्रकृतायाअपूर्वार्थत्वबोधा
57 संभवे केनचिद्धितस्यास्तद्वद्ध्येत्यपेक्षायां पात्रपदोद्देशेन विनियोगस्तत्रापूर्वसाधनत्वलक्षणायां उद्देश्यवाचकपदे गौ
कारेणत्वानुत्तरमपप्रकृतायामपि समानमिति समीन्याशयेनाह। अतोलाघवादिति। एवं तावत्प्रकृताप्रकृतानां ग्रहणे
प्रसाध्याधुना केश्चिदुक्तमप्रकृतमात्रग्रहणमपि युक्त्या पूर्वपक्षे साधयति। अप्रकृतानामेव वेति। पुरोडाशक
पालस्यानन्यथासिद्धवाचनिकविनियोगबलात्रिराकांक्षस्य विनियुक्तस्यापि विनियोगोऽगत्याश्रितः। प्रकृते तु ते
न रूपेण विनियोगाभावादन्यथानुपपत्त्यभावाच्चक्षीणत्वात्र युक्तं विनियुक्तनिराकांक्षविनियोगाश्रयणमित्युभयाकां
क्षपादाशतपातोऽप्रकृतग्रहणमेवन्याय्यं। वस्तुतस्तु अपि वाधस्तोमादौ विनियोगेन कार्यसाकांक्षत्वाभावादाकांक्षा
त्यापकत्वकमसमाख्यादिरूपसामान्यसंबंधबोधक प्रमाणेन यस्याः सामान्यतः क्रतुसंबंधोवगतस्तस्या यावद्विनि ५७
योगेन विनिकल्प्यनं ततः पूर्वमेवानयाश्रुत्या विनियोगेनाप्रकृतामात्रग्रहणमुपपादनीयं। यद्यपि तथाभूता स्तोत्रा

गभूताप्याग्नेयीभवन्नित्तथापि न स्यां स्तोत्रेत्वव निराकांक्षत्वान्नाग्रहणमित्याशयः सिद्धांतमाह । अप्रकृतेति । यद्यप्युपस्थानोग
त्वेन मंत्रस्य विधानं तत्त्वरूपे चानर्थक्यप्रसक्त्यावपूर्वसाधनत्वं लक्षणात्तथापि सर्वत्रापूर्वसाधनीभूतांगोद्देशेनांगविधा
वर्थादपूर्वार्थत्वेनापि तद्विधा

58

५८